
श्रावण–भाद्रपदौ
वर्षम् –६८
दशमोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ अगस्त २०१७

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



भारती संस्कृत-मासपत्रिका

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | प्रधानमन्त्रिणः विदेशयात्राः | श्री प्यारेमोहनशर्मा | ४ |
| ५ | मोदीसर्वकारस्य त्रीणि वर्षाणि | श्री प्यारेमोहनशर्मा | ६ |
| ६ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ७ |
| ७ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | ७ |
| ८ | संस्कृत-साहित्ये राष्ट्रचिन्तनं स्वातन्त्र्य-चेतना च | म.मः देवर्षि कलानाथ शास्त्री | ८ |
| ९ | मुरारिबापुसूत्राणि | हर्षदेवमाधवः | १४ |
| १० | संस्कृत-समाचारः | प्रबंध सम्पादकः | १६ |
| ११ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १७ |
| १२ | राष्ट्रभक्ति-गीतम् | डॉ. राजेन्द्रप्रसादभट्टः | १८ |
| १३ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १९ |
| १४ | कालिदासस्य काव्येषु संगीतकला | डॉ. हेमराज शर्मा | २० |
| १५ | आचार्यहेमचन्द्रस्य मते गृहस्थस्य चरित्रं ..... | डॉ. उषाकिरण यादवः | २१ |
| १६ | पाणिनिकृत-पञ्चपंक्तीनां विवेचनम् | श्रीकांत मुद्गलः | २४ |
| १७ | भवतु मे ''राष्ट्रम्'' | डॉ. राकेश शास्त्री | २५ |
| १८ | श्रौतयागविधौ श्रौतसूत्राणामुपयोगिता | भारती आन्दोलन | २६ |
| १९ | आस्तीकमहाकाव्यस्य साहित्ये योगदानम् | संवित् महर्षिः | २७ |
| २० | स्वच्छं भारतं नित्यम् | दीपक कुमार शर्मा | २७ |
| २१ | अमरकविप्रणीतेश्रीकीर्तिकाव्ये वैष्णवदर्शनमतं..... | पिंकेश दाधीच | २८ |
| २२ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २३ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

मूर्ध्ना यः कलिकल्मषौघशमनीं गङ्गां दधौ शर्मदः,
विल्वैस्तस्य हि पूजनं च सुधियः कुर्वन्ति वै श्रावणे।
गन्धाद्यैः कुसुमैश्च यं प्रमुदिताः प्रीणन्ति वै पण्डिताः,
भक्त्या तुष्यति योऽचिरं स भगवान् साम्बः शिवः पातु नः।।

## मासावतरणम्

श्रावण्यां सुधियः स्वपूर्वपुरुषान् प्रीणन्ति शुद्धैर्जलैः,
कृत्वा तर्पणमाचरन्ति विबुधाः गायन्ति तेषां यशः।
शास्त्रोक्तेन विधानकेन बटवः यज्ञोपवीतं शुभं
गायत्रीजपमाचरन्ति विधिना धृत्वा रवेः प्रीतये।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

श्रावण-भाद्रपदौ
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
अगस्त, 2017
अङ्कः - 10
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# एक एव करो निर्धारितः ( जी.एस.टी. )

...✍ पं. प्यारेमोहनशर्मा

जीएसटी अर्थात् वस्तु एवं सेवाकर इत्याख्यः करः जुलाई- मासस्य प्रथमे दिनाङ्के शुक्रवासरे मध्यरात्रितः प्रवृत्तः। राष्ट्रपति-प्रणवमुखर्जीमहोदयेन (बटन दबाकर) एकेन विद्युत्यन्त्रेण करोऽयं प्रवर्तितः। संसदः केन्द्रीयभवने (सेन्ट्रल हॉल) रात्रौ सार्धैकादशवादने प्रधानमन्त्री श्रीनरेन्द्रमोदीमहोदयोऽभाषत यत् (जीएसटी गुड्स एवं सर्विस टेक्स) एषः करः साधारणः श्रेष्ठतरश्चैको करो विद्यते। एष व्यापारस्य श्रेष्ठो मार्गो विद्यते। भाविसन्ततयोऽस्मभ्यं धन्यवादं प्रदास्यन्ति। राष्ट्रपतिप्रणव-मुखर्जीमहोदयोऽवदत् यत् जीएसटी-संचालनप्रक्रिया वेट सदृशी विद्यते। प्रारंभे वेटस्यापि विरोधोऽभवत्। तेऽवदन् यत् यदाहं वित्तमन्त्री आसम् मया एतद्विषये विचारः प्रकटितः। एष ऐतिहासि-कोऽवसरः चतुर्दशवर्षेभ्यः प्राचीनयात्रायाः साक्षी भविष्यति।

इतः पूर्व मोदीमहोदयोऽकथयत् जीएसटीकरेण व्यापारिणः सदाचारेण (ईमानदारी) कार्यं करिष्यन्ति। अधिकारिणाम् उत्कोचस्यावसराः समाप्तिमेष्यन्ति। एषः संयोगो विद्यते यद् गीतायामष्टादशाध्याया विद्यन्ते तथाच जीएसटी विषयेऽपि अष्टादशोपवेशनानि जातानि। अधुना स्थायिनी अस्थायिनी शुल्कप्रथा समाप्तिं यास्यति। यथा सरदारपटेलो राज्यानामेकीकरणं व्यधात् तथैव जीएसटी द्वारा आर्थिक नीतीनामेकीकरणं सर्वकारेण विहितम्। मोदी सर्वकारेण पञ्चशतम् (500) कराः समापिताः। अधुना गङ्गानगरतः ईटानगरपर्यन्तं लेहतो लक्ष्यद्वीप-पर्यन्तमेको देशः एक एव करः निर्धारितः। इतः पूर्वं भारतीयव्यापारमण्डलस्य प्रतिनिधयः केन्द्रीयवित्तराज्य-मन्त्रिणं व्यापारिणां चिन्ताविषये न्यवेदयन्। वित्तमन्त्री अरूण जेटली महोदयोऽवदत् नास्ति चिन्तायाः कोऽपि विषयः। प्रधानमन्त्री महोदयः-

चाणक्यस्य श्लोकमेकमवदत्-

**यद् दूरं दुराराध्यं यच्च दूरे व्यस्थितम्,**
**तत् सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्।**

अर्थात् किमपि वस्तु कियदपि दूरं किं न स्यात् ? तस्य प्राप्तिः कियदपि कठिनं किं न स्यात् तच्चातिदूरमप्राप्यं किं न भवेत् कठिनेन तपसा, परिश्रमेण तदपि प्राप्तुं शक्यते। अर्थात् परिश्रमः सर्वाधिकः शक्तिशाली विद्यते। अस्माभिरपि महता परिश्रमेण जीएसटी द्वारा समग्रदेशस्यार्थिकमेकीकरणं कृतम्। शीघ्रमेव सर्वे लाभान्विताः भविष्यन्ति।

# प्रधानमन्त्रिणः विदेशयात्राः

...✍ पं. प्यारेमोहनशर्मा

भारतीयप्रधानमन्त्रिणो विदेशयात्राः सदैव सार्थकाः, नैकापि एतादृशी यात्रा वर्तते या सार्थका न स्यात्। तस्य विदेशयात्राभिः भारतस्य छविरवर्धत। भारते एवासौ प्रधानमन्त्री वर्तते यः विश्वस्य प्रायः सर्वेषु देशेषु अगच्छत्। लघुतरराष्ट्रेषु तथा बृहत्तरराष्ट्रेषु शक्तिसम्पन्न-राष्ट्रेषु तथैव निर्बलराष्ट्रेषु सर्वत्रायमगच्छत्। सर्वेषां देशानां च यात्रा सार्थका अविद्यत। स्वतन्त्रभारते प्रथमप्रधानमन्त्रि- पं. जवाहरलालनेहरुमहोदयादारभ्य

मनमोहनसिंहपर्यन्तं नहि कोऽपि प्रधानमन्त्री एतावत्यः सार्थकाः यात्राः अकार्षीत्। मोदीमहोदयानां विदेशयात्राभिः विभिन्नअन्ताराष्ट्रियसूचकाङ्केषु भारतस्य क्रमः (रेंकिंग) अपि अवर्धत। आभ्यो यात्राभ्यः सकारात्मको दृष्टिकोणः स्थापनीयः। सार्क, आसियान, ब्रिक्स, विक्सटेकप्रभृतिदेशेषु संघटनेषु परिवर्तनं समागतम्। ''एक्ट ईस्टपालिसी'' पूर्वीय देशानां समानेन नियमेन आतंकवादशरणार्थी समस्यामादकपदार्थतस्करी प्रभृतिषु यन्न्यूनता समागता तत् सर्वं प्रधानमन्त्रिणो विदेशयात्राणा- मेव परिणामो विद्यते। ब्रिक्समाध्यमेन ''न्यू डवलपमेन्ट बैङ्क'' सदृश्या वित्तीयसंस्थाया घटने भारतस्य प्रमुखा भूमिका अवर्तत। प्रत्यक्षनिवेशो-ऽप्यवर्धत (एफ.डी.आई.) प्रधानमन्त्री यात्राषु देशस्य ''साफ्टपावर'' सरलशक्तिमुपायुनक्। तत् प्रभावेण स्विट्जरलैण्डसदृशेन टैक्स हेवन देशेन स्वकोषागाराणां सूचनाप्रदानाय सहमतिः प्रदत्ता। मारिशसेन सह ''कर अपवंचनसहमतिं'' विधाय भारतदेशः कृत्रिम-(जाली) निवेशकैः विधीयमानां करवंचनां करचौर्यमवरोद्धुं सक्षमः संजातः। इत्थमेव व्यावसायिकसम्बन्धेषु ट्रेडटेक्सप्रणाली सरला संजाता। विगतवर्षे भारत-स्योत्पादननिर्यातानुपातोऽप्यवर्धत। शीघ्रमेव कार्यक्षेत्रे (रोजगारे) अस्य प्रभावः दृष्टिपथमायास्यति। प्रधानमन्त्रिणः प्रयत्नानामेव फलं विद्यते यद् वयम् अन्ताराष्ट्रियस्तरे पुनः स्वकीयां स्थितिं समुपस्थापयितुं सक्षमाः सञ्जाताः। विभिन्नदेशानां राष्ट्राध्यक्षाणां शीर्षनेतृणां च भारतयात्रायै समधिकमाग्रहपत्राणि समागच्छन्ति। अस्माकं विदेशमन्त्रालयस्तेषामाग्रहं स्वीकर्तुं काठिन्यमनुभवति। इत्थं प्रधानमन्त्रिणो विदेशयात्राभिः सम्बन्धास्तैः सह सुदृढाः जायन्ते। विश्वं भारतं नवीनदृष्ट्या संप्रति पश्यति। एतेन भारतमार्थिक-राजनैतिकघटनाक्रमेषु सक्रियभूमिकां निर्वक्ष्यति। एतेन भारतस्य हितानां रक्षा तु भविष्यत्येव एतदतिरिच्य शक्तिसम्पन्नराष्ट्ररूपे भारतं देशाः ज्ञास्यन्ति।

प्रधानमन्त्रिणः अमेरीकायात्रया अमेरीकायाः राष्ट्रपतिना ट्रम्पमहोदयेन सह वार्तानन्तरमुभयोर्देशयोः सम्बन्धाः दृढाः समभूवन्। एतेन चीनदेशः क्षुब्धः संजातः। भारतस्य वर्धमानशक्त्या चीनः तुच्छकार्याणि करोति। अधुनैव मानसरोवरतिब्बतयोः यात्रायै गन्तुकामं भारतीयतीर्थयात्रिगणं सिक्कमस्य नाथूलदर्रे अवरोधयत्। चीनाधिकारिणोऽकथयन् यत् यावत् भारतीयसेना विवादितक्षेत्रात् न प्रत्यावर्तते तावत् मानसरोवरयात्रायाः स्वीकृतिं चीनो न दास्यति। वस्तुतस्तु विवादो वर्तते यत् चीनः डोकगलांमक्षेत्रे सामरिकराजमार्गं निर्मिमीषति। क्षेत्रमिदमादाय चीन-भूटानयोर्मध्ये अनेकवर्षेभ्यो विवादः प्रचलति। चीनः क्षेत्रमिदं स्वस्वामित्वे मनुते भूटानः कथयति यत् डोकलामः तस्य सीम्नि वर्तते। चीनः शङ्कते यत् भारतं गुप्तरूपेणात्र स्व-स्वामित्वं स्थापयति। भारतस्य भूटानेन सह सुदृढा आर्थिकाः राजनैतिकाः सामरिकाश्च सम्बन्धा विद्यन्ते। भूटानचीनयोर्मध्ये कूटनीतिकाः सम्बन्धा नाद्यावधि वर्तन्ते। उभौ देशौ विवादितक्षेत्रमादाय विंशतिवारं वार्ता-मकुरूतां परन्तु चीनस्यासम्यक् व्यवहारेण न कोऽपि निष्कर्षः समागच्छति। एतेनैव कारणेन तत्र भारतचीनयोः सैनिकानां मध्ये संघर्षमयं वातावरणं विद्यते। उभयपक्षतः अवैधप्रवेशारोपाः प्रचलन्ति। चीनसैनिकाः भारतीयक्षेत्रे प्रविश्य द्वे (बङ्कर) सैनिकस्थानेऽत्रोटयन्। एतद्विपरीतं-चीनस्यारोपो विद्यते यद् भारतीयाः सैनिकाः अवैधरूपेण प्रविश्य भूटानसहायतायै डोंकगलांमक्षेत्रं यावदगच्छन्।

निष्कर्षरूपेण कथयितुं शक्यते यत् प्रधानमन्त्रिणः राष्ट्रपतिट्रम्पेन सह वार्तया उभयोर्देशयोर्मध्ये यः सुदृढः सम्बन्धः समजनि तेन चीनदेशो भीतोऽभवत्।

# मोदीसर्वकारस्य त्रीणि वर्षाणि

❑ पं. प्यारेमोहनशर्मा

यदा एषः सर्वकारः शासने समागच्छत् तदा भारतस्य जनता भाजपादलादधिकं मोदीमहोदयेन आशान्विता अभवत्। प्रजा मोदीमहोदयं सर्वशक्तिमत्व रूपेऽपश्यत्। लोकाः आशान्विताः अभूवन् यत् शासने समासीनो मोदी तत्क्षणमेव सर्वासां समस्यानां समाधानं विधास्यति। अनेनैव कारणेन निर्वाचने भारतीयजनतादलेन स्पष्टं बहुमतं प्राप्तम्। यद्यपि त्रयाणां वर्षाणां समयो नास्ति पर्याप्तः समस्यानां सर्वासां समाधानाय। परन्तु सर्वथा न्यूनमपि न विद्यते। एतावता समयेन सर्वकारो यच्चिकीर्षति तस्य शुभारम्भं विदधाति परिणामा अपि समायान्ति। सर्वकारस्य देशहिते कृतानि कार्याणि अपि सम्मुखे समायान्ति। एषु त्रिषु वर्षेषु सर्वकारस्योपलब्धिः वर्तते देशस्य जनतायाः निराशायाः वातावरणसमाप्तिः। 2014 ख्रिष्टाब्दे निर्वाचनसमये सर्वत्र निराशा व्याप्तासीत्। प्रतिदिनं यूपीए सर्वकारस्य मन्त्रिणां भ्रष्टाचरणं पक्षपातकथा च समाचारमाध्यमेषु दूरदर्शने च समायाति स्म। समाचारेषु कदाचित् कामनवेल्थक्रीडा, कदाचित् टू जी, कदाचिच्च कोयलाखननं समायान्ति स्म। यद्यपि प्रधानमन्त्रिणो मनमोहनस्य छविः श्रेष्ठा अविद्यत किन्तु ते मौनमेवाधारयन्। एषु त्रिषु वर्षेषु केन्द्रसर्वकारस्य कस्यापि मन्त्रिण उपरि भ्रष्टाचास्यारोपो नैव समागतः।

प्रधानमन्त्रिणः नरेन्द्रमोदीमहोदयस्य छविस्तावत् पूर्ववर्तिभ्यः सर्वेभ्यः प्रधानमन्त्रिभ्यः श्रेष्ठतरा विद्यते। विश्वस्मिन् विश्वे मोदीमहोदयस्य प्रशंसा प्रसृता विद्यते। मोदीमहोदयस्य कार्येषु न्यूनता प्रदर्शयितुं शक्यते। परन्तु तस्य निष्ठां प्रति नहि कोऽपि किमपि दुर्वादं कर्तुं शक्नोति। जनतायाः सम्मुखे प्रतिमासं ''मनसो वार्ता'' करणमपि नास्ति साधारणं कार्यम्। तस्य मन्त्रिपरिषदि नैके स्वकार्यकुशलाः पूर्णनिष्ठया कार्ये संलग्नाः मन्त्रिणो विद्यन्ते। तेषु प्रमुखाः केचनात्र प्रस्तूयन्ते। रेलमन्त्री सुरेश प्रभुः, ऊर्जामंत्री पीयूषगोयलः, मानवसंसाधनमन्त्री प्रकाश-जावडेकरः, पेट्रोलियममन्त्री धर्मेन्द्रप्रधानः सडक-परिवहनमन्त्री नितिनगडकरीप्रभृतयः पूर्णनिष्ठया रात्रिन्दिवं स्वकीयमन्त्रालयस्य कार्यं सम्पादयन्ति-अधिकारिणां मार्गदर्शनं च कुर्वन्ति। लेशमात्रमपि भ्रष्टाचरणमेषु न संलक्ष्यते। पूर्वं रक्षामन्त्रिरूपे मनोहरपर्रिकरस्यापि कार्यं श्रेष्ठमविद्यत।

विगतत्रिषु वर्षेषु नैकानि श्रेष्ठानि कार्याणि संजातानि, परन्तु लोकतन्त्रं बाधितमपि जातम्। विपक्षसम्मानः समाप्तप्रायः संजातः। भाजपादलेन तथाचरितं मन्ये सर्वेऽपि भाजपादलस्य नेतारः दुग्धप्रक्षालिताः स्युः। काँग्रेसदलेन नियुक्ता राज्यपालाः पदाच्च्याविताः नजीबजंगः दिल्लीसर्वकारं पदे पदे अवारोधयत्। एतत सर्वमाश्चर्यजनकमेव। देशस्य प्रथमः प्रधानमत्री पं. जवाहरलालोऽकथयत् यत् विपक्षो यदा सुदृढो भविष्यति सर्वकारोऽपि तदैव श्रेष्ठतरं कार्यं सम्पादयिष्यति। इदं लक्ष्यं पूरयितुमेव सः स्वयं दलस्य सुदृढं नेतृगणं विपक्षभूमिकाभिः समायोजयत्। राष्ट्रीय-स्वयं-सेवक-संघोऽपि केषाञ्चित् श्रेष्ठनेतृणां माध्यमेन जनसंघ-मरचयत्।

वर्षत्रयात् पूर्वं निर्वाचनघोषणापत्रे यदुक्तं तत्तु भाजपादलस्यैव महान्तो नेतार एव निर्वाचनक्रीडेत्युक्त्वा अत्यजन्। जनतया यद् दत्तं तत् तस्य परितोषिकरूपेण प्रदत्तमिति मन्यामहे। प्रधानमन्त्री श्रेष्ठभारतनिर्माण-मजूघुषत्। एतदर्थं रात्रिन्दिवं कार्यमपि विहितम्। शपथग्रहणसमारोहे प्रतिवेशिनो राष्ट्राध्यक्षाः समाहूताः पाकिस्तानस्य प्रधानमन्त्रिणं नवाजशरीफमप्याह्वयत्। विकासनीतिषु यू.पी. एव सर्वकारेण स्वीकृतम्। 51 एकपञ्चाशत्प्रतिशतम् एफडीआई एवाग्रेऽवर्धापयत्। मेक इन इण्डिया बहुचर्चितमभूत् परन्तु उपार्जना- (रोजगारः)

वसराः सीमिता एव संजाताः। सर्वकार-सेवावसरा अवरुद्धाः संजाताः। देशे नक्सलवादो वर्धते। महिलाभिः सह अपराधानां संख्या वर्धते। निर्भयासदृशाः जघन्या अपराधा अपि वर्धन्ते।

कश्मीरे समस्यानियन्त्रणमेव न जायते सैनिकाः सर्जिकलस्ट्राइक द्वारा-अवश्यं पाकिस्तानं परास्तं कुर्वन्ति। प्रतिवेशिभ्यः सम्बन्धाः सुदृढाः न सन्ति। व्यापारसम्बन्धाः क्षीणतां गताः। सर्वं सञ्जातं परन्तु देशस्य जनता अद्यापि प्रधानमन्त्रिणा मोदिनं प्रतिआशान्विता विद्यते।

अधुनैव मोदीमहोदयस्य लोकप्रियताविषये कार्याणां विषये च यदन्वेषणं जनभावनाविषये (सर्वेक्षणं) कारितं तेन प्रतीयते मत् मोदीमहोदयस्य लोकप्रियता प्रत्यहं वर्धते। 2019 वर्षे निर्वाचने मोदीमहोदयस्य लोकप्रियतावशादेव भाजपादलं पूर्णबहुमतं प्राप्स्यति। विकासकार्याणि च तीव्रगत्या भविष्यन्ति। भारतस्य प्रत्येकस्मिन् ग्रामे विद्युत् प्रकाशो भविष्यति। प्रत्येकस्मिन् ग्रामे सर्वविधविकास-कार्याणि भविष्यन्ति।

---

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका**, पूर्व आचार्यः

**( 15 वी.रा. आचार्य सकल कीर्तिकृत सुभाषित रत्नावलीतः )**

**सर्वेषु जीवेषु दयां कुरु त्वं सत्यं वचो ब्रूहि धनं परेषाम्।**
**अब्रह्मसेवां त्यज सर्वकालं परिग्रहं मुञ्च कुयोनिबीजम्।।**

हे मानव ! तुम सब जीवो पर दया करो, सत्य वचन बोलो। दूसरों के धनको सदा के लिए छोडो कुशील सेवन को सर्वदा छोडो। तथा कुमति के कारणभूत अनावश्यक परिग्रह का त्याग करो।

**सम्बलं कुरु वै धर्मं मानुष्यं दुर्लभं भवेत्।**
**अयोग्यं च परित्यज्य योग्यमुक्तित्वमाचरं।।**

निश्चय से तुम धर्म का आलम्बन लो, क्योंकि यह मनुष्य रूप अत्यन्त दुर्लभ है। अतः अयोग्य नहीं करने योग्य कार्य छोड़कर योग्य-आवागमन से मुक्ति हेतु आचरण करो।

**धर्मं करोति यो नित्यं सम्पूज्यं त्रिदशेश्वरैः।**
**लक्ष्मीस्तं स्वय मायाति भुवनत्रयसंस्थिता।।**

जो इन्द्रों के द्वारा सम्यक प्रकार से पूज्यमान धर्म का सदा आचरण करता है, उसे तीनों लोकों में रहने वाली लक्ष्मी स्वयं प्राप्त होती है।

**धर्मवन्तो हि जीवस्य भृत्यः कल्पद्रुमो भवेत्।**
**चिन्तामणिः कर्मकरः कामधेनुश्च किङ्करी।।**

निश्चय ही धर्मात्मा जीव के लिए कल्पवृक्ष सेवक हो जाता है। चिन्तामणि रत्न मजदूर और कामधेनु दासी हो जाती है।

**वरं मुहूर्तमेकं च धर्मयुक्तस्य जीवितम्।**
**तद्धीनस्य वृथा वर्षकोटी कोटी विशेषतः।।**

धर्म से संयुक्त जीव का एक मुहूर्त का जीवन ही श्रेष्ठ है। और उस धर्म से रहित मनुष्य का करोड़ों वर्षों तक विशेष जीवन भी व्यर्थ है।

---

**प्रेरकप्रसङ्गशतकम्**

# त्रिपञ्चाशत्तमः प्रसङ्गः-समन्वयः

❑ **श्रीमती आराधना धर्माधिकारी**

एका नवोढा महिला शीलवती शालीनतया विनयेन च गृहे ज्येष्ठेषु सर्वेष्वभुक्तेषु स्वयं भोजनं कथं कुर्यामिति विचार्य भोजनं पक्त्वा उष्णतायुतेषु पात्रेषु स्थापयित्वा स्वयमभुक्त्वैव कार्यालये गच्छति स्म। तस्या आचरणेन सर्वे प्रसन्ना आसन्। परमेकस्मिन् दिने श्वशुरेण प्रोक्तं पुत्रि ! एवं कार्यं नैव चलिष्यति। तव स्वास्थ्यं नित्योपवासेन क्षीणं भविष्यति। त्वमस्माकं विचारं परित्यज्य भोजनं कृत्वा गच्छ वयं स्वसमये भोजनं करिष्यामः। ज्येष्ठेनापि समर्थने शिरसा स्वीकृतिः प्रदत्ता। तयाऽनुभूतमेवं समन्वयवादी श्वशुरालयः सर्वाभ्योऽपि मिलेदिति।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

# संस्कृत-साहित्ये राष्ट्रचिन्तनं स्वातन्त्र्य-चेतना च

❑ म.म: देवर्षि कलानाथ शास्त्री

अस्मिन् हि पत्रे स्वातंन्त्र्यचेतनापदस्याभिप्रेतोऽर्थः प्रथमतः स्पष्टीक्रियेत चेत् साधीयः स्यात्।

भारत-राष्ट्रस्य स्वाधीनता-संग्रामो वैदेशिकाना-मांगलानामाधिपत्यस्य विरोधे सशस्त्रैः स्वातंत्र्यचेतो-भिर्देशभक्तैः परिचालितोऽभूत्, अहिंसकैः सत्याग्रहाख्य-शस्त्रमात्रहस्तैर्देशभक्तैरपि परिचालित इति विदन्त्येव विद्वांसः। अत एव हि गौराङ्गशासनोच्छित्तये क्रियमाणं लोकमानसान्दोलनमेव स्वतंत्रतासंग्रामपदेनाभिधीयते, तस्य चारंभो झांसीराज्ञ्या लक्ष्म्यास्तांत्या टोपे प्रभृतीनां सेनानीनां च संघर्षेण अर्थात् १८५७ वर्षीयया क्रान्त्या सह भवतीति प्रचलिता मान्यता। यद्यपि मोगलानां शासनं विरुन्धानैः पृथ्वीराज-महाराणाप्रताप-प्रभृतिभिः क्षत्रियैर्महासमराः प्रकान्ता अभूवंस्तेऽपि स्वातंत्र्यसमरा एवाऽऽसन् किन्तु न ते स्वातंत्र्यसंग्रामपदेनाभिधीयन्ते यतोहि न ते समस्तस्य भारतराष्ट्रस्य स्वातंत्र्यचेतनां प्रतिनिदधुरपितु प्रान्तविशेषस्य राज्यविशेषस्य वा पराधीनताया विरोधे तच्छासकानां संघर्षस्यैव स्वरूपं दधुः। ऊनविंश्यां विंश्यां च शताब्द्यां प्रचलतः स्वातंत्र्यसमरस्यायं विशेषोऽभूद् यत्तत्पृष्ठतः समस्तस्यापि देशस्य जनानां हृदयेषु जाग्रती पारतन्त्र्य-निगडभंगोद्देश्यका मातृभूस्वातंत्र्योद्देश्यका च संघर्षभावना जृंभते स्म। इयं भावना यथा देशस्यान्यान्यभाषाणां साहित्ये प्रतिफलिता विलोक्यते तथा संस्कृतभाषायाः साहित्येऽपि तस्याः स्वराः सुस्पष्टं श्रूयन्ते। एतस्यैव संक्षिप्तं निरूपण-मुद्दिश्य प्रस्तूयन्ते कतिचन प्रमापकानि। अर्थादांगलानां शासने भारतीयानां यत् पारतंत्र्यमनुभूतं संस्कृत-साहित्य-कारैस्तस्य कतिचन निदर्शनानि, तद्विरोधे स्वातंत्र्यस्य च पक्षे या भावना अभिव्यक्तास्तासामपि कतिचन निदर्शना-न्यत्रोपस्थाप्यन्ते।

**महात्मा गांधी**

भारते अहिंसकस्य स्वातंत्र्यान्दोलनस्य नेतृत्वं प्रमुखतो मोहनदासकर्मचन्दगांधिनाऽनुष्ठितमभूत्, स एव च राष्ट्रपितेत्यभिधीयते। एवं च महात्मागांधिनमवलम्ब्य संस्कृते विपुलं साहित्यमालिख्यत यस्याऽऽकलनं न सहजम्। महात्मगांधिनं नायकत्वेन वर्णयतां काव्यानां, नाटकानां, गद्यबद्धजीवनचरित्राणां च भूयसी संख्या प्रकाशमाप्ता, बहवस्तु ग्रन्था अप्रकाशिता एव स्युरित्यनुमीयते। गांधिजन्मशताब्द्या अवसरे गांधी-शान्तिप्रतिष्ठानेन विविधभाषासु गांधिनमुद्दिश्य लिखित-स्योलेखनीयस्य वाङ्मयस्य सूचीग्रन्थानां प्रकाशनं कृतमभूत्। तेष्वेकतमो ग्रन्थः संस्कृतग्रन्था-नवलंब्यैव १९८२ वत्सरे प्राकाश्यत। अत्र हि प्रामुख्येन २९ काव्यानां विवरणं च स्वकाव्यविषयं कल्पयति। एतेषु हि पंडिता क्षमाराव इत्याख्यायाः कवयित्र्याः १९३२ वत्सरे प्रकाशिता सत्याग्रहगीता, उत्तरसत्या-ग्रहगीता, स्वराज्यविजयः इत्याख्यं काव्यत्रयं सुविदितं देशे। यदा हि स्वातंत्र्यसमरः प्रचलन्नासीत् तदा क्षमया सत्याग्रहगीता व्यलेखि। सा १९३२ वत्सरे पेरिसतः प्रकाशिताऽस्ति। अत्रायमेव हेतुर्भवेद् यद् भारतात् तदा तस्याः प्रकाशनं नाऽभूत्सरलम्। स्वातंत्र्य-लाभानन्तरमस्या द्वितीयं संस्करणं १९५६ वर्षेऽवश्यं भारतादेव (बम्बई तः) प्राकाशि। अस्यां हि गीतायां गांधिनो वर्तुल-पटल-संमेलनाय कृतां लन्दनयात्रां (गोलमेज सम्मेलन, Round Table Conference) अभिव्याप्य (तावत्पर्यन्तं) स्वातंत्र्यसंग्रामेतिहासो वर्णितोऽस्ति। तदनन्तरं स्वातंत्र्यलाभात्पूर्वतनो वृत्तान्त उत्तरसत्याग्रहगीतायामुपनिबद्धो या १९४८ वत्सरे प्रकाशिताऽभूत्। स्वातंत्र्योपलब्धेरनंतरं गांधिनो गोलोक-प्रयाणपर्यन्तं वृत्तं स्वराज्यविजयाख्ये काव्ये तयोपनिबद्धम् यत् १९६२ वत्सरे प्राकाशि।

अपरा काव्यशृंखला प्रसिद्धस्य वैष्णवाचार्यस्य श्रीभगवदाचार्यस्य कृतिरस्ति यो हि स्वातंत्र्यसंघर्षस्य पूर्णतः समर्थकोऽभूत्। अनेन काव्यत्रयी भारतपारिजातम्, पारिजातापहारः, पारिजातसौरभम् इत्याख्या पारिजात-

रूपकमुत्थाप्य व्यलेखि। प्रथमे हि काव्ये गांधिनो जन्मारभ्य साबरमतीआश्रमस्थापनापर्यन्त इतिहासो निबद्धः, द्वितीये भारत छोड़ो आन्दोलनपर्यन्त इतिहासः, अन्तिमे च गांधिनः स्वर्गारोहणपर्यन्तम्। प्रथमं काव्यं सर्वप्रथममफ्रीकादेशीयात् कीनियाप्रदेशात्प्रकाशितमभूत् स्वातंत्र्यात् पूर्वं भारते तादृशसौविध्याभावस्य सुस्पष्टत्वात्।

दिङ्मात्रं निदर्शितेनानेन विवरणेन स्पष्टीभवति यत् संस्कृतकवीनां सूक्ष्मा दृष्टिः कथं स्वाधीनतासमरस्यावलोकनं कुर्वाणाऽभूत्, कथं च तेषां लेखनी महाकाव्यानां प्रणयने स्वातंत्र्यसंघर्षसमर्थने सक्रियाभूत्। एतेषु कविषु भगवदाचार्यसदृशा वैष्णवाचार्याः प्रौढाः कवयश्चासन्। समस्ते भारते, उत्तर-दक्षिणप्रान्तेषु, पश्चिमपूर्वप्रान्तेषु, सर्वत्र परिनिष्ठितैः कविभिरेवंविधं साहित्यं प्रणीयते स्म, यस्य विपुलं परिमाणं शनैः शनैः शोधार्थिनां समक्षमुपसरति। एवंविधास्त्रिंशद् ग्रन्थास्तु सूचिता एव, मुक्तकवितानां, निबन्धानां, टिप्पणीनां च संख्यानमप्यसंभवम्।

गांधिनो जीवनकाले १९४४ वत्सरेऽभिनन्दनग्रन्थ एकस्तस्मै समार्प्यत यत्र समस्तानां भारतीयभाषाणां प्रथितैर्मूर्धन्यैः कविभिस्तासु तासु भाषासु गांधिनः प्रशस्तिः, तस्य संघर्षस्य समर्थनं चाभिव्यक्तमभूत्। अत्र रवीन्द्रनाथठाकुर, सुब्रह्मण्यभारती, वल्लतोल, सरोजिनी-नायडू, मैथिलीशरण पन्त, महादेवी प्रभृतीनां ताः काव्यरचनाः प्रकाशमभजन् याः परस्तात्काव्यजगति सुप्रथिता अभूवन्। अस्मिन् हि ग्रन्थे भारतप्रसिद्धानां त्रयोदश संस्कृतविद्वत्कवीनां हृदयोद्गारा अपि प्राकाश्यन्त येषु विधुशेखर भट्टाचार्य, महादेवशास्त्री, गोपालशास्त्री दर्शनकेसरी, नारायणशास्त्री खिस्ते, क्षमाराव, भट्टमथुरानाथशास्त्री, भगवदाचार्य प्रभृतीनां काव्यरचनाः समाविष्टा अभूवन्। ग्रन्थस्यास्य भूमिका सर्वपल्लिराधाकृष्णैर्लिखिता, लखनऊतश्चायं प्राकाश्यत। स्वयं महात्मगांधिनोऽपि प्रत्युत्तरमत्रैव प्रकाशितमासीत्। अत्राभिव्यक्तेषूद्गारेषु स्पष्टतः समीक्षितुं पार्येत यत् स्वातंत्र्यचेतनाया आन्तरिकं समर्थनं कथं संस्कृतकविहृदयान्यकार्षुः।

**आंगलशासनम्**

यद्यपि तदानीन्तनेन ब्रिटिशशासनेन संस्कृतस्योत्थानाय विविधाश्चेष्टाः कुर्वाणेन संस्कृतपंडिताः प्रकामं समतोष्यन्त, महामहोपाध्यायादिपदवीप्रदानेन यस्तेषां संमानोऽक्रियत तेनापि बहवो विद्वांसस्तत्प्रशंसका अजायन्त। विंश्याः शताब्द्या आरम्भे तु योजनाबद्धास्तादृशाः प्रयासा अपि ब्रिटिशशासनसमर्थकैरक्रियन्त येन संस्कृतनिबद्धा आंगलप्रशस्ती-रवलोक्य भारतीया जनता आंगलविरोधं परित्यजेत्। राजभक्तिप्रकाशः, जार्जचरितम् इत्यादयो ग्रन्थाः संस्कृते व्यलेखिषत, दिल्लीनगरे पंचमजार्जस्य 1911 वर्षे समायोजिते दरबाराख्ये समारोहे कतिचन प्रमुखा विद्वांसोऽप्यामंत्र्यन्त। अस्मिन्नवसरे 16 दिसंबर 1911 दिने दिल्ल्याः सुप्रतिष्ठितैर्विद्वद्भिः म.म. बाँकेरायनवल-गोस्वामिनां नेतृत्वे राजभक्ति-प्रकाशाख्यं पुस्तकं पंचमजार्जाय, मैर्याख्यायै साम्राज्ञ्यै च समार्पि यस्मिन् राजभक्तिप्रशंसा अर्थात् ब्रिटिशशासनस्य प्रशंसा तत्समर्थनं वाभूत्। एषु वत्सरेषु आंग्लानां प्रेरणया दिल्लीउत्तरप्रदेशादिप्रान्तीयैः कतिपयैरांगल-समर्थकैस्तदानीं विश्रुतानां संस्कृतविदुषामुक्तयः संगृह्य समये-समये प्राकाश्यन्त याभिः प्रजानां राजभक्तेर्या परंपरा देशे संमाननीयाऽस्ति तस्या उल्लेखोऽक्रियत। मया सुबहु साहित्यं तादृशं संगृहीतमस्ति यत्रैवंविधा राजभक्तिः प्राकाश्यमायाति। रायबहादुरादिपदवीधारिभिः भारते लब्धप्रतिष्ठैः म. म. बाँकेराय नवल गोस्वामी प्रभृतिभिः प्रेरितं तादृशं साहित्यमस्ति साम्प्रतमपि मत्सविधे किन्तु तद् दृष्ट्वा प्रथमदृष्ट्यैव स्फुटीभवति यत्त सर्वं शासकीयप्रेरणाजन्यं प्रकटतः क्रियमाणं प्रशस्तिवाचनमेवाभूत्। अत्र हि भारतीयाः पंडितैः प्रेरिता अभूवन् यत्प्रथममहायुद्धसमये ब्रिटेनस्य विजयाय मन्दिरेषु प्रार्थना कार्या। तत्प्रेरणया स्वयं जयपुरीयैः पं. चन्द्रधरगुलेरिभिरपि प्रथमविश्वयुद्धावसरे हिन्दुभिः प्रार्थनावसरे पठनोचितं पद्यद्वयं प्रसारितं यत्र ''धर्माय युध्यति चमूर्नृपजार्जभक्ता तस्यै जयं परमकारुणिक! प्रयच्छ'' इत्यादीनि प्रार्थनावाक्यान्यभूवन्, किन्तु तत्तेषां हार्दमभूदिति न शक्यते वक्तुं यतो हि हृदयस्यान्तस्तलाद् ये

उद्गारास्तद्विधानां विदुषां प्रादुरभवंस्तेषु वैदेशिक-शासनस्य न्यक्कार:, अथ च स्वातंत्र्यस्य महिमाख्यान-मेवोपलभ्यते, न स्वामिभक्ति:। एकमेव निदर्शनमेतस्य पर्याप्तं स्यात्। जयपुरीयै: कविशिरोमणिभट्टमथुरानाथ-शास्त्रिभि: 1935-1940 वर्ष-मध्ये या: समस्यापूर्तयो-ऽक्रियन्त तासु निभृतं तादृशा उद्गारा: प्रच्छन्नतया न्यवेश्यन्त ये गांधिप्रभृतीनां देशनेतृणां दमनस्य विरोधं व्यंजयन्ति एका प्राचीना समस्यास्ति ''मशकदशनमध्ये दन्तिन: संचरन्ति।'' तां पूरयित्वा भट्टमहाभागैरिदं पद्यं निरमायि-

**नृपतिभवनघूकैरेतकैर्जञ्झपूकैर्निभृतनिगडबद्धान्**
**देशनेतृन् निरीक्ष्य।**
**नियतमुचित-वक्ता वक्तुमीशीत नूनं मशकदशनमध्ये**
**दन्तिन: संचरन्ति।।**

महात्म-गान्धिन: कृते संस्कृतविद्वद्भिर्ये उद्गारा: प्रकटितास्तेषु वैदेशिकदासतापाशमुक्ते: स्वतंत्रतायाश्च तीव्रोऽभिलाष: स्फुटीभवति। स्वातंत्र्यस्यानन्तरं य उल्लासोऽभिव्यक्तिमापत्, तेनापीदं प्रमाण्यते। सर्वैरव संस्कृतपत्रै: स्वातंत्र्यस्य साह्लादं हार्दिकमभिनन्दनं विहितम्, विशेषांका: प्रकाशिता:, काव्यानि विलिखितानि। डा. वेंकटराघवेन **स्वराज्यकेतु:**, डा. कुन्हन् राजेन **भारतप्रशस्ति:**, रामकृष्णभट्टेन (बेंगलूरु) **स्वातंत्र्य-ज्योति:**, इत्यादीनि काव्यानि प्राणीयन्त प्राकाश्यन्त च । जयपुरीयेण संस्कृतरत्नाकरपत्रेण अगस्त 47 अंके संपादकस्य भट्टश्रीमथुरानाथस्य घनाक्षरीच्छन्दोबद्धोऽयं हर्षोद्गार: प्रकाशित:-

**विश्वमंडलेऽस्मिन् गुरुगौरवं भजन्ती सेयमार्यवैजयन्ती**
**जगन्मौलौ परित: प्रवातु।**
**सर्वतोऽपि पूर्वं मानवीयसभ्यताया गुरुर्देशो**
**दत्तसभ्यतोपदेशो मंगलं दधातु।**
**नूनं नीतिनैपुणेन नीचैर्नमयन्ती शठान्**
**दूरं दमयन्ती भटान् प्रेमभरात्संपृणातु।**
**पूर्वपरतंत्रतामपास्यामोघमंत्रतया**
**सर्वत: स्वतंत्रतया भारतविभा विभातु।।**

अस्मिन्नंके देवकीनन्दनप्रश्नवराख्येन कविना ''स्वतंत्रभारत जय जय जय'' गीतिर्विलिखितास्ति। संपादकस्य भट्टमथुरानाथशास्त्रिणो हृदये सेयं वेदनाऽवश्यं जागर्तिस्म यद् भारतस्य विभाजनं संजातम्। अतस्तेन व्यलेखि-

**भारतमिदमतिचिरात् पुराभूत् पूर्णस्वतंत्रम्।**
**बहुतर-वत्सरशते गतेऽपि च यत् परतन्त्रम्।**
**तदिह दैवगतिवशाद् विभाजनदुर्नयदीनम्।**
**चतुरधिकद्विसहस्रवत्सरेऽभूत् स्वाधीनम्।**
**संप्रति स्वतंत्रराष्ट्रान्तरे प्रजातंत्र-परिभासनात्।**
**इह जयति जयपुराभ्यन्तरे नव्या श्रीर्नवशासनात्।।**

अपभ्रंशभाषाव्यवहृतं छप्पयच्छन्द इदम्। अत एव संयोगाद्यं गुरु इत्यादयो यतिनियमा: किंचिच्छैथिल्यमाप्ता दृश्येरन्। जयपुरवैभवम् इत्याख्ये काव्ये पद्यमिदं जयपुरनगरेतिहास-प्रंसगे पततीति तादृशोऽत्रोल्लेख:। जयपुरीया राजानो मोगलानां दासा अभूवन्निति सामान्या-धारणा किन्तु भट्टमहोदयै: **मोगल-साम्राज्य-सूत्रधारो महाराजो मानसिंह** इत्याख्य ऐतिहासिको य उपन्यासो व्यलेखि तस्यानुशीलनेन प्रतीयते यल्लेखको मोगला-नामनुसरणं साधीयो न मन्यते, अत एव प्रकारान्तरै: प्रमाणयति यज्जयपुरनरेशैरकबरस्यानुसरणं न कृतं, तस्य शासनं सदुपदेशैर्देशहितकारि कथं भवेदित्येत्कृते प्रयतितम्।

**स्वातंत्र्य-भावना**

एतानि निदर्शनानि स्फोरयन्ति यत् स्वातंत्र्य-कामित्वं संस्कृत-साहित्यकारस्य स्वभावगतं किंचन तत्त्वम्। संस्कृतभाषैव सर्वतंत्रस्वतंत्रा काचन विश्वजनीना वाक्। अत एव भारतीय-भाषासु स्वातंत्र्यकामनाया, दासतामुक्तिसंग्रामस्य वा यत्र कुत्रापि प्रभावी उल्लेखोऽ-भिलाषो वा व्यंजयितुमिष्टोऽभूत् संस्कृतभाषाऽपरिहार्य-त्वेनोपसृप्ता। वंकिमचन्द्रेण आनन्दमठाख्ये स्वोपन्यासे वन्देमातरम् शीर्षकवहा या गीतिर्लिखिता सा भारतेतिहासेऽजरामरा संजाता। उपन्यासोऽयं वङ्ग-

भाषायां विलिखितः, तस्यामेव भाषायामियं गीतिर्लिलिखिषिताऽभूत् किन्तु संस्कृतभाषाया महिमानमनुरुध्य प्रथमाः पङ्क्तयः संस्कृते, अन्तिमा अपि संस्कृते विलिखिता बंकिमेन, मध्ये वंगा भाषीयाः पंक्तयः। सेयं सरणिर्महाराष्ट्र-भाषयाऽप्यनुसृता। स्वातंत्र्यवीरेण विनायकदामोदर-सावरकरेण ''**काला पाणी**'' शीर्षक उपन्यास एकः स्वातंत्र्य-संघर्षं प्रेरयितुं व्यलेखि, तत्र देवीं स्वतंत्रतां संबोध्य गीतिरेका तेन लिलिखिषिता तत्रापि प्रथमाः पंक्तयः संस्कृते सन्ति-

**स्वतंत्रते भगवति त्वामहं यशोयुतां वन्दे।**
**जयोऽस्तु ते श्रीमहन्मंगले शिवास्पदे शुभदे।।**

भारतीयसाहित्येऽमूल्यनिधित्वेनेयं गीतिः सुप्रथिताऽस्ति। गीतिद्वयस्यास्योल्लेख इदमुद्दिश्यैव कृतो यत्संस्कृतस्य भाषिके महिम्नि स्वातंत्र्यं त्वनुस्यूतमिव प्रतीयते। संस्कृतस्य प्रथम आधुनिकयुगीन उपन्यासः **शिवराजविजयः** (श्रीमदम्बिकादत्तव्यासविलिखितः) स्वातंत्र्य-चेतनामेवाधारीकुरुते। अत्र शिवाजी राजस्य मोगलशासकानां विरोधे स्वातंत्र्यार्थं संघर्षः कथावस्तुत्वं बिभर्ति। बंगभाषीयस्य **महाराष्ट्र जीवनप्रभात** शीर्षक-स्योपन्यासस्याधारमादायोपन्यासस्यास्य लिखितत्वात्, तस्मिंश्चोपन्यासे स्वातंत्र्यसमरस्यैव प्रामुख्येन चित्रितत्वात् सर्वोऽप्यस्य परिवेशः स्वातंत्र्यवीराणां महिम्ना सुरभितः। अत्र तु सुदूरवनप्रान्तरस्था योगिनोऽपि निभृतं देशभक्तेः, पराधीनतापाशमोचनयज्ञस्य च पुरोधसः।

**राष्ट्रनेतॄणां जीवनचरित्राणि -**

इदमेव कारणं यत् संस्कृते न केवलं गान्धिनः अपितु तिलक नेहरू राजेन्द्रप्रसाद सुभाषचन्द्रबोस प्रभृतीनां सर्वेषामपि देशनेतॄणां चरित्राणि सगौरवं काव्ये गद्ये वा निबद्धानि संस्कृतसाहित्यकारैः। यथा पंढरीनाथ- पाठकेन '**महात्मचरितं**' व्यलिख्यत तथा वासुदेवशास्त्रिणा बागेवाड़ीकरेण लोकमान्यतिलकस्यापि जीवनं '**तिलकचरितम्**' 'गांधीचरितम्' वद्व्यलेखि। १९५६ ई. वर्षे तिलकस्य जन्मशताब्दी देशे सममान्यत। तस्मिन्नवसरे तिलकस्य जीवनचरित्रं बहुभिः संस्कृत-लेखकैः संस्कृते व्यलेखि। डॉ० श्रीधर भास्करवर्णेकरेण तु स्वातंत्र्यवीरस्य विनायकदामोदरसावरकरस्य जीवनमाधृत्य **विनायक-वैजयन्ती** काव्यं प्राणीयत। गुना (मध्यप्रदेश) तः प्रकाशिते संस्कृतकवेः सामेश्वरव्यासस्य **भारतीयनररत्नसमुच्च-याख्ये** काव्ये सर्वेषां स्वतंत्रतासेनानीनां तादृशस्य स्वाधीनतासंघर्षस्य काव्यमयं चित्रणमुपलभ्यते। रोहित-कतः (१९५८) सत्य देव वासिष्ठः **सत्याग्रहनीति-काव्यमलिखत्** प्राकाशयञ्च। पं. सत्यदेव वासिष्ठः स्वयं राष्ट्रियान्दोलने सक्रियत्वेस्मन प्रावर्तत। स हरियाणाप्रान्ते निवसन् संस्कृतं सेवते। ज्वालापुरतः १९५९ वर्षे प्रकाशिते **महापुरुषकीर्तनम्** इत्याख्ये पद्यबद्धे जीवनवृत्तसंग्रहे धर्मदेव विद्यावाचस्पतिना रामकृष्ण बुद्ध विवेकानन्दा-दीनारभ्य तिलक लाला लाजपतराय-विपिनचन्द्रपाल सुभाष बोस सरदारपटेल श्यामाप्रसाद मुखर्जी-अबुल कलाम आजाद विनोबा भावे प्रभृतीनां स्वातंत्र्यवीराणां चरित्रं पद्यैः स्तुतम्। अस्यान्तिमेऽध्याये कन्फ्यूशियस सुकरात न्यूटन-लिंकनादीनां स्तुतिरपि निबद्धास्ति या संस्कृतकवेर्विश्वजनीनां दृष्टिमेव प्रमाणयतीति तु कथान्तरम्। अत्र हि शतं महापुरुषाणां स्तुतिरुपलभ्यते। जयपुरीयेण देवकीनन्दनशर्मणा '**राष्ट्रभक्तपंचकम्**' इतिशीर्षकेण प्रतापशिवाजितिलकगांधिसुभाषाणां जीवन-मवलंब्य प्रशस्तयः प्रकाशिताः।

किमधिकं विलिख्येत। संस्कृते हि भारतीय-स्वातंत्र्यसंग्रामस्येतिहासस्तदानीं विलिखितः प्रकाशितश्च यदा न केचन योजनाबद्धाः प्रयत्नाः स्वातंत्र्येतिहास-लेखनाय प्रारब्धा अभूवन् शासनतन्त्रेण। गदग-(कर्णाटक) तः प्रकाश्यमानाया मधुरवाणीपत्रिकायाः संपादकेन गलगली पंढरीनाथाचार्येण '**भारतीय स्वातंत्र्यसंग्रामस्येतिहासः**' शीर्षकग्रन्थे स्वकीयेन परिज्ञानेनैव मुगलशासनकालमारभ्य योऽसन्तोषः प्रादुरभवत्तमाधारीकृत्य स्वातंत्र्यचेतनाया विकासस्य, झांसीराइया लक्ष्म्याः, तांत्या टोपे इत्यादीनां च नेतृत्वे १८५७ वत्सरे प्रचालितस्य संग्रामस्य, तत्र कित्तूर-नगरीयायाः

चेन्नम्माया, अमरसिंह, बहादुरशाहजफर इत्यादीनां भूमिकायाः, मेरठझांसी कानपुर दिल्लीप्रभृतिनगरेषु घटितानां क्रान्तिमयीनां घटनानां, तदनन्तरं, सत्याग्रहादीनां विकासस्य, स्वातंत्र्यज्वालायाः पूर्णप्रकाशस्य, पर्यन्ते १९४७ वर्षे स्वातंत्र्यप्राप्तेश्च समग्रमपि वृत्तं संस्कृतगद्ये निबद्धम्। अनेन हि १८५७ वर्षीयां क्रान्तिमेव स्वातंत्र्यसमरस्यारंभं मत्वा स्वकीये ग्रन्थे तदिदमुपन्यस्तं यदस्माकं स्वातंत्र्येतिहासः तात्याटोपीमारभ्य गांधीटोपी-पर्यन्तस्य वृत्तान्त-स्याभिलेखः।

औरगांबाद (बिहार)स्य डॉ० रुद्रदत्तपाठकेनापि **भारतीयरत्नचरिते** देशनेतृणां चरित्राण्येवोपनिबद्धानि। नेहरूम्, इन्दिरां चाप्यवलंब्य महाकाव्यानि, नाटकानि, कविताः, गद्यबंधाश्च भूयस्यां संख्यायां प्राकाश्यन्त। **इन्दिराचरितं** लालबहादुरशास्त्रिसंस्कृतविद्यापीठतः प्राकाशि। **नेहरूविजयव्यायोगादयस्तु** श्रीजीवन्याय-तीर्थादिभिः विलिखिता एव, काव्यान्यप्युत्तरप्रदेशतः प्राकाश्यन्त। किमपरम्, जयपुरीयेण पं. नवलकिशोर कांकरेण वैदिक्यां भाषायां वैदिकेषु च्छन्दःसु च '**राष्ट्रवेदस्य**' प्रणयनं कृतं यत्र राष्ट्रनेतॄन् संबोध्य सूक्तानि विलिखितानि सन्ति येषु इन्दिराऽप्यस्ति। जयपुरीयेण वैद्य चन्द्रशेखरशास्त्रिणा '**इन्दिराप्रशस्ति**' गद्यपद्यमयी लिखिता प्रकाशमाप्तास्ति।

प्रयागीयेण डॉ. जयशंकरत्रिपाठिना प्रकाशितं स्वलिखितम् ''**अस्मिता**'' काव्यं चन्द्रशेखर आजादस्य संघर्षं' प्राणोत्सर्गञ्चाधुनिके गेयच्छन्दसि महिममंडितं विदधाति। मध्यप्रदेशीयेन सोमेश्वरव्यासेन गद्यबद्धो **भारतीयनररत्नसमुच्चयाख्यो** यो राष्ट्रनेतृजीवनवृत्त-संकलनस्वरूपो ग्रन्थः प्रकाशितस्तत्रापि संपूर्णः स्वातंत्र्य-संग्रामो वर्णित उपलभ्यते। राघोगढ (म०प्र०) तः १९६१ वत्सरे प्रकाशितेऽस्मिन् गद्यग्रन्थे राष्ट्रीयभावनाः स्वातंत्र्य-चेतना च पदे-पदे प्रस्फुटन्ति। रघुनाथप्रसाद चतुर्वेदेन **गांधीगरिमकाव्यम्, जवाहरज्योतिर्महाकाव्य-मित्यादिशीर्षकैः** काव्यशृंखला लिखिता प्रकाशिता च। मथुराप्रसाददीक्षितानां **भारतविजयनाटकं**, महादेव-पांडेयानां '**भारतशतकं**' च सुप्रथितमेव विद्वत्समाजे।

इदमपि विस्मयकरं स्यान्नूतनानामध्येतॄणां यद् बहुभिः संस्कृतविद्वद्भिः स्वतंत्रतासंघर्षे (क्रान्ति-कारिदलारब्धे) सक्रियतया सहभागित्वं निरुह्योत्कृष्टं सर्जनं संस्कृते विहितं तत्र चौजस्विनी राष्ट्रभक्तिः पौरुषाभिव्यंजिका देशभक्तभूमिका च महिम्ना मंडिता। उदाहरणविधया आचार्यश्रीमदमृतवाग्भवस्योल्लेखः कर्तुं शक्यते येन लिखितो **राष्ट्रालोकाख्यः** काव्यग्रन्थः सभाष्यः प्रकाशमाप्तः। काश्यां जन्म लब्ध्वा वैद्यनाथशास्त्री वरकले इत्याख्योऽयं महाराष्ट्रब्राह्मणो वाराणस्यादिषु संस्कृताध्ययनं कृत्वा हिमाचलोपत्यकामारभ्य मध्यदेशं यावद् यायावरभावेन यात्राम् अविरतं विदधानः क्रान्तिकरणके स्वातंत्र्यसमरे सक्रियतया कार्यमकरोत्। अयं हि तांत्रिकसाधनारतो विद्वानभूत्; श्रीविद्योपासकः ओजस्वी कविरपि। अनेन परशुरामस्तोत्रादिकाव्य-रचनां कृतवता **राष्ट्रालोक** नामके काव्ये राष्ट्रस्य स्वरूपं, देशवासिनां कर्त्तव्यमित्यादि वस्तुजातं विवृतम्, तस्य विवरणात्मकं संजीवनभाष्यमपि लिखितं यत्र विस्तरशः उद्दामराष्ट्रभक्तेः प्रेरणाऽभिव्यक्ता। राजस्थाने भरतपुरादिनगरेष्वपि कंचित्कालं न्युषितवानयम्। एतस्य कृतित्वाकलनपरका संस्था जयपुरे कार्यरताऽस्ति।

स्वयं गोवर्धनपीठाधीशाः पंडितप्रकांडाः प्रातः-स्मरणीयाः श्रीभारतीकृष्णतीर्थपादाः स्वातंत्र्यसंग्रामे सक्रियतया समवायन्त, कारागृहयात्रामप्यकुर्वन्, तत्र च अलीबन्धुभिः सह निगडबद्धास्तिष्ठन्तो मोगलानपि राष्ट्रस्वातंत्र्यसंग्रामे सहचरा इति भ्रातृवत्पश्यन्तस्ता-दृशमुदाहरणं प्रास्तुवन् यदितिहासे सुवर्णाक्षरैरुट्टंकितं स्थास्यति। मथुराप्रसाददीक्षितस्य **भारतविजयं** नाटकं सुविदितमेव, वेदान्तरत्नं ओड़लमने पांडुरंगशास्त्री सुप्रथितो विद्वान्भूत्। तल्लिखिता **सत्याग्रहकथा** दक्षिणभारतीयान् सर्वानपि विदुषः प्रैरिरदिति को न जानीते। श्रीधर भास्करवर्णेकरेण वीरसावरकरं नायकं मन्वानेन यथा

**विनायकवैजयन्तीकाव्यं** व्यलेखि तथा राजेन्द्रप्रसाद-मवलंब्य **राजेन्द्रतरंगिणी** जवाहरलालनेहरूमवलंब्य च **जवाहरतरंगिणी** व्यलेखिषाताम्। जवाहरतरंगिणी स्वयं नेहरूणा दृष्टाऽभिरोचिता च। तदीयो हस्तलेखोऽपि परस्ताद् ग्रन्थेन सह प्राकाशि।

संस्कृतविद्वांसः स्वभवनेषु स्थिताः स्वातंत्र्य-संग्रामस्य वाचिकं समर्थनं कुर्वाणा अभूवन्निति कथनं न भवेत्पारमार्थिकम्। सत्यं त्विदमस्ति यदनेकैः संस्कृत-पंडितैर्न केवलं स्वातंत्र्यसमरे सक्रियं योगदानं तस्य नेतृत्वं वा विहितं किन्तु बहुभिरनेकान् वर्षान् कारागारयातना अपि सोढाः। तादृश इतिहासो नाद्यावधि पूर्णतां गतः। प्रत्येकं प्रदेशे शतशस्तादृशानां संस्कृतपंडितानां त्यागस्यात्मो-त्सर्गस्य च गाथा भवेयुः। अस्माभिः श्रीभारतीकृष्णतीर्थ अमृतवाग्भव सत्यदेववासिष्ठ प्रभृतीनां कतिपय-विदुषां संकेतस्तु कृतचर एव, अन्येऽपि बहवस्तादृशा विद्वांसः स्युः।

एकमन्यन्निदर्शनमस्मिन् प्रसंगे संगतं स्यात्। लाहौरीय गवर्नमेंट औरियंटल कालेजे प्राचार्याद् वुलनरात्, व्याकरणाचार्यात् म.म. पं. शिवदत्तशास्त्रिणश्च संस्कृत-शास्त्राण्यधीत्य हरियाणायां लब्धजन्मा दिल्लीनगरे पार्यन्तिकं जीवनं व्यतियापितवान् पं. जयरामशास्त्री साहित्याचार्यो बीकानेरस्थे डूंगरकालेजे संस्कृत-प्राध्यापकः समभवत्। तदानीं संपूर्णानन्दः (यो राजस्थान-राज्यपाल, उत्तरप्रदेशमुख्यमंत्री चाभूत्) कालेजस्यास्य प्रधानाचार्योऽभूत्। अयं जयरामशास्त्री स्वाधीनतासंग्रामे बहुकालं यावत्कारागारेऽस्थात् विविधा यातनाश्चाऽसहिष्ट। एतस्योपरि स्वजन्मभूमिनिवासस्थानादिषु प्रवेशस्य यः प्रतिबन्धोऽभूत्तेनायं घोरतमयातना असहिष्टेत्यनेनैव स्पष्टीकृतमस्ति स्वपरिचये चतुर्दशवर्षावधि भारतगुप्त-विभागक्रूर प्रतिबन्ध-परिभुक्तघोर-यमयातनेन। अयं हि ''**गांधीकल्पद्रुमाख्यं**'' काव्यं प्राणयत्। अनेन '**जवाहर-वसन्तसाम्राज्यम्**' इत्याख्यं काव्यं 1950 वत्सरे प्राकाशि यत् श्रीजवाहरलालनेहरवे समर्पितम्। अस्मिन् काव्ये श्रीकृष्णो नायकः किन्तु रूपकविधया राष्ट्रभावनाः, स्वातंत्र्यसंग्रामः, स्वतंत्रताप्राप्तिस्तदनन्तरं च देशोन्नति-रित्यादिविषया निभृतं सूचिताः सन्ति। अप्रत्यक्षविधया तत्सूचनस्य कारणं तु तादृश्यो यातना एव भवेयुरिति सहजतयैवानुमातुं शक्यते। 1951 वर्षे दिल्लीतः प्रकाशितोऽयं ग्रन्थः।

दिल्लीस्थैः भारतप्रसिद्धैः श्रीप्रभुदत्तशास्त्रिभिः दिल्लीत एव प्रकाशिता राष्ट्रभक्तिपरा ग्रन्थास्तु सुपरिचिता एव स्युर्भवताम्। ''**राष्ट्रकाव्यामृतम्**'', ''**गांधीनांदी-श्राद्धामृतम्**'', ''**चर्खावन्दनामृतम्**'' इत्यादीनि शीर्षकाण्येव स्वतः, काव्यानामेषां विषयवस्तु स्फोरयन्ति। 1956 वर्षे दिल्लीतः प्रकाशितानि कतिपयानि काव्यानि मया दृष्टचराणि। बिहारप्रदेशीयः सुललितो गीतकारो रामनाथपाठकः प्रणयी अद्यत्वे न भवेत् परिचितः संस्कृतज्ञानां किन्तु दशकचतुष्टयपूर्वमयं देशस्य प्रमुखेषु कविष्वगण्यत। अनेन स्वगीतिसंकलनं ''**राष्ट्रवाणी**'' शीर्षकेण 1952 वत्सरे आरातः प्राकाश्यत। अत्र ललितभावनाबद्धा गीतयोऽपि सन्ति, राष्ट्रभक्तिपरा गीतयोऽपि। प्रथमा गीतिः ''**जयतु भारतवर्ष देशः**'' इत्यस्ति। ''**अहमस्मि रणभेरीरवः**'' इत्येका गीतिः। अस्मिन् प्रौढे संस्कृते पं. महोदवपांडेयानां, हिन्दीभाषायां च हजारीप्रसाद द्विवेदानां प्रशस्तिर्भूमिकादयश्च सन्ति।

बीकानेरनगरीयैः पं. फाल्गुनगोस्वामिभिः '**जयभारतदेश**' शीर्षकं चम्पूकाव्यं निरमायि यत्र प्रखरा राष्ट्रभक्तिः प्रतिफलिताऽस्ति। अत्र हि समग्रस्य भारतेतिहासस्य पृष्ठभूमौ भारतोपरि चीनाक्रमणसमये पाकिस्तानाक्रमणसमये च प्रदर्शितस्य भारतसैन्यशौर्यस्य वर्णनं विस्तरेण विहितमस्ति। देशाय कृतोत्सर्गा वीरा अत्र स्तुताः, प्रबला राष्ट्रभक्तिश्च जागरिता इति स्पष्टमेवात्र द्रष्टुं शक्यम्।

**सदस्यचरः संस्कृताऽऽयोगस्य, भारतशासने,**
**प्रधानसम्पादकः 'भारती' संस्कृतपत्रिकायाः,**
**भूतपूर्वः अध्यक्षः, राजस्थान-संस्कृत-अकादम्याः**
**सी-स्कीम, पृथ्वीराजरोड़, जयपुरम्-302001**

# मुरारिबापुसूत्राणि

❑ हर्षदेवमाधवः

**परमात्मा पाषाणे चैतन्यप्रदाता –**

ईसुख्रिस्तस्य समीपे एका निराधारा स्त्री समागता। ईसुख्रिस्तस्य कालस्य असौ अहल्या आसीत्। सर्वे जनाः पाषाणगुटिकाभिः तां भृशमताडयन्। रामायणस्य अहल्या न अपलायत किन्तु स्थैर्यमगच्छत्। रामायणस्य अहल्या स्वयमेव पाषाणरूपा आसीत्। अतः पाषाणगुटिकां क्षेप्तुं न कोऽपि समर्थ आसीत्। ईसुख्रिस्तस्य अहल्या स्वात्मानं त्रातुम् ईश्वरस्य पुत्रस्य समीपं गता। रामायणस्य अहल्यायां रामस्य चरणारविन्दस्पर्शोऽभवत्। ख्रिस्तस्य 'अहल्या' ख्रिस्तस्य पादयोः अपतत्। रामायणं कथयति यत्, 'गै पतिलोक आनन्द भरी।' रामः अहल्यायाः पत्या सह पुनर्मेलनं कारयति। ईसुख्रिस्तस्य कथायां तस्याः पतितायाः किमभवद् इति वयं न जानीमः। अहं न तुलनां करोमि। किन्तु दर्शनं कारयामि। प्रसङ्गद्वये साम्यं वर्तते यदि धर्मयोः भित्तिः दूरीभवेत् तर्हि सर्वत्र साम्यं वर्तते। असावेव प्रकाशः सर्वत्र द्योतते।

**प्रकाशः कारागृहस्थो न कर्तव्यः –**

ईसुख्रिस्तेन कथितं यद्, '**अहं विश्वस्य प्रकाशः।**' भगवता कृष्णेनापि कथितं यत्, '**तेजः तेजस्विनामहम्, बलं बलवतामस्मि, बुद्धिः बुद्धिमतामस्मीति।**' प्रकाशोऽपि परमात्मनो विभूतिः।

प्रकाशः परमात्मनो दिव्यविभूतिः। अतः प्रकाशं दीपं प्रज्वाल्य पर्वतशिखरसदृशम् उन्नतस्थानं नयन्तु, उच्छ्रियमाणं नयन्तु। यतः दीपतेजः चतुर्दिक्षु प्रसरेत्। मा कुरुत प्रकाशं गृहभित्तिकारागृहस्थम्। प्रकाशं मा बन्दिनं कुरुत। न कुत्रापि भित्तिः अवशिष्येत। तत्त्वतः धर्मयोर्मध्ये भित्तिं विनाशयतु। धर्माणां भित्तयः, धर्मैः रचिता भित्तयः विनाशनीयाः।

**गुरुचरणौ स्मर्तव्यौ ध्यातव्यौ –**

अहल्या श्रीरामचरणरजःपरागस्पर्शेण पवित्रा जाता। गौतमशापवशात् अहल्या पाषाणीभूता। कदाचित् स्वस्खलनप्रायश्चित्तार्थं सा मूकीभूता। कुमार्गं गतां स्वचञ्चलतां संहर्तुं सा उपाविशत्। यदा कोऽपि मनुष्यः स्वचाञ्चल्यं त्यक्त्वा स्थैर्यं भजति, तदा तेन अयोध्यां न गन्तव्यम्। स्थिरभक्तं प्रति रामः स्वयमेव आगमिष्यति। वयं मनुष्याः, अतः पापानि भवन्ति। स्खलनानि भवन्ति, किन्तु तेषां पुनरावर्तनं न भवेत् तदा स्वयमेव परमात्मा अस्माकं समीपे आगच्छति।

विश्वामित्रः पतितस्त्रियः पक्षपाती। यतः विश्वामित्रो न कापि व्यक्तिः। स विश्वमैत्रीमयी चेतना। असौ महर्षिः पाषाणस्य आत्मनः शब्दं शृणोति, 'अहल्या न किञ्चित् ब्रवीति किन्तु, स्वयं ऋषिः कथयति'–

**''गौतम नारि श्राप बस उपल देह धरि धीर।**
**चरन कमल रज चाहति कृपा करहु रघुबीर।।''**

'**कमलम्**' अर्थात् संगरहितः आचारः। अत्र चरणे एव कमले कमलोपरि परागरजः भवति। चरणयोः मृत्तिकारजः श्लिष्यति। यदा चरणे कमले भवतः तदा मृत्तिकारजः परागरजः भवति। अहल्या रामचरणरजः स्पृहयति। अत्र कानिचित् कारणानि सन्ति :–

(१)अहल्या सुन्दरी आसीत्, किन्तु तस्याः रुचिः, न सुरुचिः किन्तु कुरुचिः आसीत्। यत् महात्मना गौतमेन सह निवसन्ती सा सहस्राक्षम् अकामयत। अतः रामस्य चरणरजः कुरुचिं नाशयति। अहल्यायां पुनरपि चरणरजः सुगन्धं प्रविशेत्, तस्याः वासनादुर्गन्धः दूरीभवेत्। अत एव सा रामचरणरजः स्पृह्यति।

(२)रामो विश्वगुरुः। गुरुचरणरजः कुरुचिं नाशयति, यथा– रामचरिते मानसे कथितं– '**बन्दउ गुरुपद पदुम परागा।**'

(३)रामो रसमयोऽस्ति। अहल्या नीरसा बभूव, यदा कोऽपि मनुष्यः स्खलनं करोति तदा स नैराश्ये (Depression) जीवति। रामस्य चरणरजः रसमयं वर्तते।

(४)**बंदउ गुरुपद पदुम परागा।**
**सुरुचि सुबास, सरस, अनुरागा।**

अहल्या इन्द्रं प्रति रागवती जाता। रागः स्थूलप्रेम्णः पर्यायः। रागस्य शमनम् अनुरागेण भवति। रामस्य चरणकमलपरागः अहल्यायै अनुरागं दातुं समर्थः। अतः कथितं – '**चरणकमलरज चाहती**'

(५)अहल्या मनोरोगपीडिता जाता। आश्रमवासिनीं तां कामनाः अभ्यद्रवन्। कामरोगात् मुक्तिं प्राप्तुं रामस्य अर्थात् गुरोः चरणरजः एव औषधिः। अपथं गमनम् अपि रोगः।

(६)**अहल्या शङ्करसदृशी वर्तते।** यद्यपि शिवः कामविजेता अहल्या कामग्रस्ता किन्तु समुद्रमन्थनकाले शिवः विषपानं चकार। अहल्या पतिशापविषं पपौ।

शिवः सर्पभूषणः, अहल्याऽपि सर्पभूषणा, यतः कामसर्पेण सा दष्टा। शिवलिङ्गस्वरूपे शिवः स्थाणुः तथैव अहल्या अपि पाषाणमयी। अहल्या शिवसदृशी अस्ति, किन्तु सा विभूतिः नास्ति। रामचरणरजः विभूतिः अतः सा रामकृपां ययाचे।

(७)अहल्या अमङ्गलकृत्यम् अकरोत्। पापस्य छायया मनसि अप्रसन्ना जाता। अमङ्गलप्रवृत्तिः अप्रसन्नतायाः जननी। रामस्य चरणरजः प्रसन्नतादायिनी। '**मंगल मंजुल मोद प्रसूति।**' भगवदाश्रितस्य, गुरुचरणाश्रितस्य मनसः मालिन्यं दूरीकर्तुं चरणरजः समर्थम्।

(८)गुरुचरणरजः, रामचरणरजः वराकानि कलङ्कानि नाशयितुम् अलम्। विश्वामित्रः कथयति– 'हे राम! भवच्चरणरजस्तिलकेन अहल्यायाः सर्वकलङ्कानि नंक्ष्यन्ति। अपि च गुणगणः प्रत्यागमिष्यति।' यथा '**जनमन मंजु मुकुर मल हरनी। किएँ तिलक गुन बन बस करनी।**'

(९) अहल्यया नेत्राभ्यां परपुरुषदर्शनपापं कृतम्। यदि नेत्रद्वयम् इन्द्रं नाद्रक्ष्यत्, तर्हि अहल्या आकृष्टा नाभविष्यत्। नेत्रदोषं दूरीकर्तुं नयनामृतस्य आवश्यकता वर्तते। गुरुचरणरजः नयनामृतं भवति। रज एव अंजनमस्ति यथा '**गुरु पद रज मृदु मंजुल अंजन। नयन अमिअ दृग दोष बिभंजन।।**' अत एव अहल्या रामचरणरजः कामयामास।

(१०) कदाचित् मोहवशात् विवेको विनश्यति। रामस्य चरणरजः सुविवेकदृष्टिं दातुं सामर्थ्यं वर्तते, यथा– '**तेहि करि विमल विवेक विलोचन। बरनउँ रामचरित भवमोचन।।**' विश्वामित्रः कथयति– 'हे राम! भवच्चरणधूलौ विवेकदानकौशलं वर्तते।'

(११) सद्गुरुचरणरजसः प्रेम्णो जन्म भवति, भक्त्या जन्म भवति। यतः चरणरजसा रजोगुणः नश्यति। इत्थं रजसः महिमा वर्तते। परमात्मनः गुरुमहाराजस्य चरणरजसा सर्वमपि प्राप्यते।

**भारतं न चमत्काराणां, साक्षात्काराणां राष्ट्रम्।**

ईसुख्रिस्तः जलात् सुरानिर्माणं चकार। अहं कथयामि यत्, 'यत् किञ्चिद् वस्तु स्यात् किन्तु तत् कस्य हस्ते वर्तते तदेव महत्त्वपूर्णम्।' अहं अत्र सुराशब्देन भौतिक-सुरायाः ग्रहणं न करोमि। अहं दृढं विश्वस्तोऽस्मि यत् बुद्धपुरुषः जलम् अपि स्पृशेत् तदा जलम् अपि हरिनामसंकीर्त-नादीप्सितं जनयति। '**नाम खुमारी नानका लगी रहे दिन रैन।**' यदा हरिनाम्नः मदोऽनुभूयते तदा जलमपि अमृते परिवर्तते। जलं जीवनोत्साहं दातुं शक्नोति। ऋग्वेदे मन्त्रोऽस्ति यथा– '**इदमापः प्रवहत यत्किं च दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम्।।**'

ऋषिः प्रार्थयति यत्, 'हे जलदेवते ! जानता अजानता वा मया किञ्चिद् दुरितं कृतम्, तत् प्रवाहय तथैव प्रवह।'( श्रीसांईगुरुणा जलं तैले परिवर्तितम् अपि च जलाद् दीपाः प्रज्वालिताः इति प्रसिद्धम्।)

यथा भगवान् वेदः कथयति यत्, 'अस्माभिः यद् अनृतम् उक्तं पापात्, द्रोहात्, क्रोधात् वा अकर्म कृतं तद् हे जलदेवते! प्रवाहय।' 'हरिनाम' पापं दूरीकरोति। हरिनाम जलवत् प्रवहन्ती करुणा वर्तते। अत एव विश्वामित्र उवाच– '**चरितं रघुनाथस्य शतकोटिप्र-विस्तरम्।। एकैकमक्षरं पुंसां महापातकनाशनम्।।**'

अत एव अहं कथयामि, यत् 'भारते सर्वचमत्काराः प्रत्यक्षाः यतो भारतं स्वयमेव चमत्कारः, चमत्काराणां देशो नास्ति, साक्षात्काराणां देशो वर्तते।'

**नम्रता परमेश्वररूपिणी।**

जेरुसलेमनगरशब्दे **'सलेम'** अर्थात् उर्दूभाषायां सलाम अर्थात् 'वन्दनम्'। वन्दनं शान्तिसूचकम्। उपनिषत् सूचयति यत्, 'सह नाववतु सह नौ भुनक्तु...' सर्वेषां सहास्तित्वं शान्तिमयं भवेत्। मा विद्विषावहै अर्थात् वयं परस्परं द्वेषरहिता भवेम। ईसुख्रिस्तः पर्वतशिखरं जगाम। तेन सह केचिज्जनाः जग्मुः। ते पप्रच्छुः, 'को ननु धन्यः? को ननु धन्यः? इति।' ख्रिस्तः प्रत्युवाच- 'जीवने नम्रो भवेत् स एव पृथिव्या राज्यस्य स्वर्गराज्यस्य च अधिकारी भवेत्।' भगवान् वेदः नम्रतां परमेश्वररूपिणीं मत्वा वन्दनं करोति। ऋषिः कथयति यत्, 'अहं नम्रतारूपिणीं परमेश्वरीं नमामि। नम्रता माम् उच्चैः नयतु। अहङ्कारात् कृतानि पापानि नम्रता क्षालयत्विति।'

अहं वारं वारं कथयामि यत्, 'नाम' जपतु। भगवन्नाम्नो जपं करोतु। 'नाम' इति शब्दे 'नम्' धातु वर्तते। यदा भगवन्नाम जपतु अथवा कस्यचिदपि नाम वदतु तदा नम्रतापूर्वकं वदतु। वेदे आपोदेवताया वन्दना कृता। 'आपः' अर्थात् प्रवाहमय्याः विचारधारायाः वन्दना। ईसुख्रिस्तः अपि नम्रतां समर्थयति।

**ईसुख्रिस्तस्य पञ्चवस्तुषु पञ्चामृतम्।**

ईसुख्रिस्तः पञ्चवस्तुषु श्रद्दधाति। तेन पञ्चवस्तूनां समर्थनं कृतम्।

**(१) नम्रता**

**(२) सारल्यम्**

ईसुख्रिस्तस्य जीवनं नम्रतया सह सरलमासीत्। केचित् जनाः व्यवहारेषु मौग्ध्यं, निश्छलत्वं, निष्कापट्यं प्रदर्शयन्ति किन्तु, अन्तःकरणेषु नम्रता न भवति, यदि कोऽपि रजोगुणमयानि वस्त्राणि धारयति तदा तान् द्विषन्ति। महापुरुषाः निरातङ्काः सौख्यकारिणः (Comfortable) न सन्ति। विजयार्थं न खड्गस्य वा बोम्बस्य आवश्यकता। केवलं प्रेम्णा, करुणया, निष्कापट्येन विजयः प्राप्यते। ईसुख्रिस्तः नम्रश्च सरलश्च आसीत्।

**8, राजतिलक बंगलोज, आबादनगर, बोपल, अहमदाबाद**

संस्कृत-समाचारः

# भारतात्मा-अशोकसिंघलवैदिकपुरस्कारः

भारतीयसंस्कृतेराधाररूपाणां प्राचीनतमग्रन्थानां वेदानाम् अध्ययनाध्यापनयोः संलग्नानां वैदिकानां संस्कृतानुरागिणाञ्च कृते शुभसमाचारः वर्तते यद् भारते प्रथमवारं वेदसेवायां संलग्नेभ्यः वैदिकेभ्यः एतावत्पर्यन्तस्य सर्वोच्चवैदिक-पुरस्कारः घोषितः ''भारतात्मा-अशोकसिंघलवैदिक-पुरस्कारः'', यश्च एतस्माद् वर्षादारभ्य प्रतिवर्षं प्रदास्यते। पुरस्कारेऽस्मिन् चयनिताय उत्तमवेदविद्यालयाय सप्तलक्ष-रुप्यकाणि प्रमाणपत्रञ्च, आदर्शवेदाध्यापकाय पञ्चलक्षरुप्य-काणि प्रमाणपत्रञ्च, उत्कृष्टवेदविद्यार्थिने त्रिलक्षरुप्यकाणि प्रमाणपत्रञ्च सन्ति। अस्मिन् वर्षे इमे पुरस्काराः सिंघलप्रतिष्ठानेन अक्टुम्बरमासस्य पञ्चदिनाङ्के नवदेहल्यां प्रदास्यन्ते। पुरस्कारार्थम् आवेदनाय अन्तिमदिनाङ्कः- १४/०८/२०१७ वर्तते। गतद्वादशवर्षेभ्यः सञ्चालिताः वेदविद्यालयाः, गतदशवर्षेभ्यः वेदाध्यापनरताः वेदाध्यापकाः, क्रमस्तरे अथवा घनस्तरे वेदाध्ययनं कुर्वाणाः छात्राश्च आवेदनं कर्तुं योग्याः। आवेदनपत्रम् www.bharatatmapuraskar.org इत्यतः प्राप्य पूरयित्वा प्रेषयितुं शक्यते।

पुरस्कारोऽयं भारतात्मा-अशोकमहाभागानां स्मृतो सिंघलप्रतिष्ठानेन प्रथमवारं प्रदीयते। श्री पि.पि.सिङ्घल-महाभागैः स्वजीवनकाले समारब्धानां धार्मिककार्याणाम् अनुवर्तनाय एतेषां महाशयानां त्रिभिः पुत्रैः सिङ्घलप्रतिष्ठानं (पञ्जीकृतसंस्था) समुपस्थापितम्। पि.पि. सिङ्घलवर्याः भारतात्माअशोकमहाभगाानाम् अग्रजाः आसन्। सिङ्घल-प्रतिष्ठानं विद्यार्थिभ्यः, वैदिकेभ्यः, विद्यालयेभ्यः, क्रीडाभ्यः, क्रीडकेभ्यः, दिव्याङ्गेभ्यः, तदर्थपाठशालाभ्यः, इतरानेक-विधसाङ्घिकाभिवृद्धिकार्येभ्यः धनसाहाय्यं प्रददाति।

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# डॉ. सुरेन्द्रकुमारशर्मप्रस्तुता ग्रन्थाः

''अपरा काशी'' नाम्ना प्रसिद्धाया जयपुरनगर्याः सुप्रतिष्ठितं स्वयंसेविसंस्कृतशिक्षाकेन्द्रमास्ते श्रीदादू-संस्कृतमहाविद्यालयनाम्ना प्रसिद्धः स्नातकोत्तरसंस्कृत-महाविद्यालयः। शतं वर्षाणि व्यतियान्ति स्व. स्वामिलक्ष्मीराममहाभागैः स्थापितस्यास्य। अग्रिमे वर्षद्वयेऽस्य शताब्दीसमारोहाः समायोज्येरन्नित्या-शास्यते। कालेजस्यास्य साम्प्रतिकेन प्राचार्येण डॉ. सुरेन्द्रकुमारशर्मणाऽनेके गतिविधयोऽत्रेदंप्रथमतया प्रारब्धा येषु 'शोध एवं प्रकाशन विभागस्य' स्थापना-ऽप्येकोऽस्ति, भट्टश्रीमथुरानाथशास्त्रिप्रभृतिकालजयि-साहित्यकाराणामनुशीलनाय तन्नाम्ना शोधप्रकोष्ठानां स्थापनाऽन्योऽस्ति। शोध एवं प्रकाशनविभागेन पाण्डुलिपिसंग्रहणस्य, सम्पादनस्य, प्रकाशनादीनां च कार्यं प्रारब्धम्। अनेन बहवो ग्रन्थाः प्रकाशिता येषु ग्रन्थ-त्रयं सपद्येवाऽधिगतम्।

**पद्यपाणिनीयम्**

संस्कृतव्याकरणस्याऽऽधारभूतानां सिद्धान्तानाम-धिगमाय यथा छात्रा लघुसिद्धान्तकौमुद्यादीन् पठन्ति तथा पद्यबद्धं किञ्चित् पुस्तकं प्रारम्भिकान् सिद्धान्तान् बोधयेच्चेत्तदपि स्वागतार्हमिति कृत्वा 21 परिच्छेदेषु, अनुष्टुप्छन्दसि, के स्वराः, कानि व्यंजनानि, स्थान-प्रयत्नादयः, संज्ञा, प्रत्ययाः, सन्धयः, लकाराः, क्त-क्तवतू इत्यादीनां प्राथमिकबोधनाय सरलया रीत्या 72 पृष्ठेषु व्याकरणस्य पारिभाषिकशब्दानां परिचयो बिदुषैकेन निबद्धोऽस्ति। रूचिकरोऽयं संग्रहः सिध्येत् पाठकाना-मिति विश्वसिमः। ग्रन्थोऽयं प्ररम्भिकीमाधारभूतां शिक्षां प्रतिनिदधाति।

**फक्किकांशानां विवृतिः**

अपरो ग्रन्थोऽस्ति शास्त्रीयविवेचनपद्धतिं मध्य-कालिकीं प्रतिनिदधानो विद्वाल्लिखितानां व्याकरण-फक्किकानां संग्रहणाय समर्पितो ग्रन्थः। अत्र 13 परिच्छेदेषु संज्ञा, परिभाषा, सन्धयः, षड्लिङ्गानि, अव्ययाः स्त्रीप्रत्यया इत्यादिषु विषयेषु कुत्रचन कमपि शब्दं, सूत्रं परिभाषां वा दृष्ट्वा तद्व्याख्यां कुर्वाणाः कतिपयाः पंक्तय उद्धृताः या मध्यकालिकपण्डितेषु ''फक्किका'' शब्देनाऽभिधीयन्ते स्म। सर्पिष्कुण्डिका-शब्दे तु विसर्गस्य षत्वं किन्तु ''मातुः कृपा'' इत्यत्र किमिति न ? ''मातुष्कृपा'' किमिति न भवति? एतत्कृते विसर्गसन्धिशीर्षकेण फक्किकात्रयमुद्धृतमस्ति। इत्थं 13 विभागेषु फक्किकाः (गद्ये) संगृहीताः। विस्तृतायां 40 पृष्ठीयभूमिकायां व्याकरण-शास्त्रेतिहासविषयिणी जिज्ञासूनां सुतरामुपकारिणी शोधात्मिका सामग्री संगृहीताऽस्ति, यथा 59 व्याकरण- प्रवर्तकाः केऽभूवन्? गार्ग्य-जातूकर्ण्य-पाणिनि-भारद्वाज-यास्कप्रभृतय परिगणिताः, अष्टौ शाब्दिकाः, दशप्रातिशाख्यानि च नामितानि, तदनु भागुरि-पौष्करसादि-स्फोटायन प्रभृतयः, परिचायिताः, तदनु किं सूत्रम्? इति परिचाययितुं सूत्रलक्षणं प्रस्तुतम्।

इत्थं हि प्रौढपण्डितानां बौद्धिकव्यायामस्य प्रातिनिध्यं कुर्वाणाः ''फक्किका'' नाम्ना प्रसिद्धा विमर्श-पंक्तयः पुरातनपथानुयायिनां मध्यकालीनानां विदुषां परीक्षणाय बहुधोपयुज्यन्ते स्म। तासामयं संग्रहो रुचिकरः, शिक्षाप्रदः, संग्रहणीयश्चास्तीत्यस्य कृते वर्धाप्यन्ते डॉ. सुरेन्द्रकुमारशर्माणः।

**श्रीमद्भगवतीगीता**

यदवधि महाभारतान्तर्गतायाः श्रीमद्भगवद्गीतायाः प्रकृष्टो महिमा सर्वत्र व्यापितुमारब्धः, शतशो गीताः उदभवन्निति विदन्त्येव विपश्चितः। अष्टावक्रगीता,

विदुरगीता प्रभृतयः, शताधिका गीतास्तु राजस्थानविश्व-विद्यालयीयेन दर्शनविभाग-विशिष्टानुसन्धान केन्द्रेण डॉ. राजेन्द्रप्रसादशर्मणां नेतृत्वे प्रतिबोधिताः, बह्व्यश्च प्रकाशिताः। यदि भगवतः श्रीकृष्णस्य मुखपङ्क-जान्निर्गता भगवद्गीता तादृशं महिमानमारूढवती तर्हि शक्तिपूजकानां कृते, देवीभक्तानां कृते भगवद्गीतावदेव ''भगवतीगीता'' किमिति नाऽऽद्रियेतेत्यभिलाषो भगवतीभक्तानां स्वाभाविक एव। अत एव भागवत-पुराणवदेवाभिहितात् कस्माच्चन ''श्रीमन्महाभागवत-महापुराणात्'', श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्म-विद्यायां योगशास्त्रे यथाऽष्टादशाध्यायाः समुद्भूताः तथा कस्मिंश्चिदद्भुते क्षणे ''भगवतीगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे पञ्चाध्याया'' अवतीर्णा ये भगवत्या उपासनायां प्रयुज्येरन्नित्ययमभिलाषः स्वाभाविक एव।

सेयमेव भगवतीगीता सभूमिका सहिन्द्यनुवादा, देवी पूजाविधिसहिता मुद्रिताऽस्तीति दृष्ट्वा आश्चर्यस्य, कौतूहलस्य प्रमोदस्य च भावशबलतायां निमग्नाः स्मो वयं तस्मादेव कालात्। एतस्याः, सम्पादनं डॉ. सुरेन्द्रकुमार-शर्मणा कृतमिति विज्ञाय पुलकिताः स्युः सर्वविधाः पाठकाः। भगवद्गीतायां यथाऽर्जुनस्य सन्देहान् निराकरोति भगवान् वासुदेवस्तथाऽस्यां भगवतीगीतायां हिमालयस्य प्रश्नानुत्तरयन्ती भगवती पार्वती परमं ज्ञानं तस्मै प्रददातीति वर्णितमस्ति। अयमपरो विलक्षणः प्रमोदावसरः। सा कथयति ''अपि चेत् सुदुराचारो भजते माननन्यभाक्। सोऽपि पापविनिर्मुक्तो मुच्यते भव-बन्धनात्।'' एवंविधानि गीतानुकारीणि पद्यानि केनचन विरचय्य कृता सेयं गीता। एवंविधानि पुराणानि कदा कथं प्रादुरभूवन्नित्याद्यपि रोचकस्य शोधस्य विषयः। एतेषां कृते सुमहान्तमवसरं ददत्येवं-विधा ग्रन्था इत्येतेषां प्रस्तोतारः सर्वथा साधुवादमर्हन्ति।

**पद्यपाणिनीयम् : पृ. 72 मू. 100/-, फक्किकांशानां विवृतिः पृ.सं. 120 मू. 200/-, श्रीमद्भगवतीगीता पृ.सं. 60 मूल्यं नाऽङ्कितम्। डॉ. सुरेन्द्रकुमारशर्मा। प्रका. शोध एवं प्रकाशनविभागः श्रीदादूसंस्कृतमहाविद्यालयः, मोती-डूंगरी, जयपुरम्।**

---

# राष्ट्रभक्ति-गीतम्

**❑ डॉ. राजेन्द्रप्रसादभट्टः**

**( रागः - जन-गण-मन-अधिनायक-जय हे ! )**

**''दिनकर इव शुभनायक !**
**जय हे ! भारतदेश ! यशस्विन्!,**
**अध्यात्मक=सैन्य-कृषि-साधन-सिन्धो !,**
**वैश्विक-शान्ति-सुबन्धो! दुर्ग-हिमालय-**
**गंगाऽऽसक्ता विश्व-शिवाय च शक्ताः।**
**तव शुभ-नाम्ना धीतास्-तव शुभ-नाम्न गीताः,**
**लोकास्तव जय-युक्ताः। जन-गण-सद्गुण-**
**भूषित! जय हे ! भारतदेश ! यशस्विन् !,**
**जय हे ! जय हे ! जय हे !**
**जय, जय, जय, जय, हे !''**

**।। जयतु भारतम्।।**

**पीठस्थ-राजकीय-शास्त्रि-संस्कृत-महाविद्यालयीयः प्राचार्यचरः, ग्रामः-घोटदः, तहसीलः-सागवाड़ा, जिला-डूंगरपुरम् ( राजस्थानम् )-पिन-314027**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- **अष्टाविंशतितमः प्रसङ्गः**

# समस्तायां रात्रौ पदयात्रा कृता

❑ **वेणीमाधव गो. धर्माधिकारी**

पञ्चनदप्रान्तप्रचारकाः श्रीमन्तः अनन्तरामचन्द्र-गोखलेमहोदयाः वर्णयन्ति-घटनेयं 1939 ई. वर्ष-स्यास्ति-श्रीमन्तः आप्टेमहोदयाः कर्णपुरीं (कानपुरे) समागता आसन्। कर्णपुरस्य पार्श्ववर्तिषु नगरेषु संघकार्यस्य प्रारम्भः क्रियमाण आसीत्। कर्णपुरादेका-दशमाइलात्मके दूरे उन्नावाख्यं क्षेत्रमस्ति। तस्मिन् छात्राणां सायं शाखा प्रारब्धा आसीत्। विचारः आयातस्तत्र आप्टेमहोदयानां कार्यक्रमो भवेत्। कार्यक्रमस्यायोजन-मेवं निर्णीतम्। सायम् आप्टे-महोदयाः तत्रागच्छेयुः। शाखाकार्यक्रमानन्तरं भोजनं, ततश्च तत्रत्यानां प्रौढनागरिकाणामधिवेशनं भवेत्। तदनन्तरं दशवादने वाष्पयानेन कर्णपुरे प्रत्यावर्तनं कर्तव्यम्। कर्णपुरे सनातनधर्ममहाविद्यालयछात्रावासस्य दशद्वादशछात्रैः प्रातः नवाबगंजवसतौ श्रीमतां रामचन्द्र-शुक्लवाक्कीलानां गृहे आगमनार्थे सूचितमासीत्।

तत्कालीनैरस्माकं प्रान्तप्रचारकैः श्रीमद्भिर्भाऊराव-देवरसमहोदयैः सह आप्टेमहोदयाः सायमुन्नावक्षेत्रे सम्प्राप्ताः। भोजनानन्तरं रात्रौ प्रौढनागरिकाणामधिवे-शनमारब्धं, परमधिवेशनसमाप्तिसमये एकादशवादन-वेला संजाता। दशवादनस्य बाष्पयानसमयोतिक्रान्तः। यानं विलम्बे-नागत्यापि प्रस्थितम्। अपरस्मिन् दिने प्रातस्तेषु दिवसेषु कर्णपुरे गन्तुं बाष्पयानं नासीत्। कर्णपुरे गन्तुमश्वयानादिकमपि न सम्प्राप्तम्। श्रीमद्भिर्भाऊ-रावदेवरसमहोदयैराप्टेमहोदयानां समक्षं प्रस्तावः स्थापितः- अधुना अस्माभिरुन्नावक्षेत्रे एव विश्रामः करणीयः। प्रातश्चतुर्वादने उत्थाय कर्णपुरे गन्तुं चलिष्यामः। छात्रावासविद्यार्थिनामधिवेशनात्पूर्वं नियत-समये तत्र प्राप्स्यामः।

आप्टेमहोदयाः अवदन्- एवं वयं नैव प्राप्स्यामः। कोप्यश्वरथचालको महति प्रभाते उत्थातुं नैव शक्नोति। उत्थायातिशीघ्रातिशीघ्रं चलिष्यति चेत्पंचसार्द्धपंच-वादने। सोऽपि न कोऽपि स्वीयो जनः, तस्य को विश्वासः। अत एव उन्नावक्षेत्रे रात्रिविश्रामस्य वार्तां त्यजत। कर्णपुरमस्ति कियद्दूरम् अधुना एकादश-वादनवेला संजाता प्रातस्त्रिचतुर्वादनं यावद् वयं पादाभ्याम् एव चलित्वा कर्णपुरे स्वस्थाने प्राप्स्यामः। अहमवदं, महोदय! श्वः प्रभाते नास्त्यधिवेशनम्। दशद्वादशछात्रान् मेलितुं सूचितमस्ति। विचार्य-तामश्वरथकारणेन वयं विलम्बेन प्राप्तास्तदापि छात्रावासे गत्वाहं तानानेष्यामि। तेषु केचन स्वयंसेवका अपि सन्ति। आप्टेमहोदयाः अवदन्-नहि बन्धो! नेदंभविष्यति विद्यार्थिनः मिलितुमागमिष्यन्ति तान् वयं समये न मिलिताश्चेत्तेषु कुसंस्कारः पतिष्यति। पुनराहूय विलम्बेनागमनस्य कारणेवबोधितेऽपि कुसंस्कारो न गमिष्यति। इदं कथयित्वा भाऊरावं पश्यन्नहं पृष्टः किमधुना चलने का बाधा किं श्रान्ता भविष्यथ ?

अधुना नासीत्किमपि कथयितुमवसरः। रात्रा-वेकादशवादनसमये आप्टेमहोदयैः सहाहं भाऊरावदेवर-समहोदयाश्च कर्णपुरार्थं पदातय एव प्रचलिताः। वयं मौनमास्थायैव प्रचलन्त आसम। श्रीमता आप्टे-महोदयानां गतिस्तीव्रा आसीत्। कर्णपुरपर्यन्तमपि तेषां गतौ नासीदन्तरम्। कर्णपुरस्य गंगासेतुरागतः। तत्रैकं मरुत्तरयानं सम्प्राप्तम्। तेन बाष्पयानविश्रामस्थलं यावत्प्रापिताः। प्रातश्चतुर्वादनात्पूर्व वयं कार्यक्रमस्थले नवाबगंजे सम्प्राप्ताः। तदनन्तरं निद्रायाः प्रश्न एव नासीत्। प्रातः षड्वादनसमये षट्संख्यायामेव छात्राः समागताः। श्रीमन्त आप्टेमहोदयाः प्रसन्नतापूर्वकं सार्द्धहोरापर्यन्तं तैर्वार्तालापमकुर्वन्। श्रान्तत्वस्य नामापि नासीत्। केनापि छात्रेण नावगतं यत्तैस्सह समये मेलितुमेव ते समग्ररात्रौ

**ब्रह्मपुरी, जयपुरम्**

# कालिदासस्य काव्येषु संगीतकला

❑ डॉ. हेमराज शर्मा

अखिलेऽस्मिन् विश्वसंस्कृतसाहित्ये कविता-वनिता-विलासः कविकुलगुरुकालिदासः महाकवित्वेन प्रथितो जेगीयते। भारतीयसंस्कृतसाहित्यस्य परिचयस्तुकालिदासं विनाऽपूर्ण एवेति। भारतीयसंस्कृतसाहित्यस्य स्वर्णकाले सद्भावात् महाकवेरस्य यशोगीतिः सर्वत्र गीयते। कालिदासस्य काव्येषु न केवलं न्यायमीमांसावेदान्तादिशास्त्राणां वर्णनमपितु नृत्य-संगीतचित्रकलेत्यादिललित-कलानामपि समावेशः प्रकृष्टरूपेण वर्तते। कालिदासस्य समकालीनसामाजिकवातावरणे एतासां ललितकलानां प्राचुर्यमासीत्। साहित्यं खलु समाजस्य प्रतिबिम्बभूतमिति निश्चप्रचम्। तेन कालिदासस्य साहित्येऽपि तदानीन्तन-समाजस्य प्रतिबिम्बरूपेण ललितकलानां समावेशो विद्यते। तत्र संगीतस्याऽर्थः-

**गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते।**

तत्रैव आचार्यहेमचन्द्रेणोच्यते यत्-

**गीतवाद्यनृत्यत्रयं नाट्यं तौर्यत्रिकं च तत्।**
**संगीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्तेर्नाट्यधर्मिकाः।।**

तत्र संगीतस्य अध्ययनं प्रकारद्वयेण प्राचीनकाले क्रियते लौकिकं सैद्धान्तिकं चेति। प्राचीनकालादेव लौकिकसंगीत-स्याऽभ्यासः स्त्रीभिः प्राधान्येन क्रियते स्म। तत्र सैद्धान्तिक-संगीतस्य विषये मालविकाग्निमित्रनाटके कालिदासेन वर्णनं क्रियते। तत्र संगीतशालाया अपि वर्णनं प्राप्यते यत्र सुतीर्थाः शिक्षका राजपरिवारजनेषु संगीतनृत्यचित्रकलानां शिक्षणकार्यं कुर्वन्ति स्म। ते शिक्षकाः नियतवेतनं प्राप्य स्वकर्मणि तथा च विभिन्नस्पर्धासु-प्रवृत्ता भवन्ति स्म इति-

**अङ्गसत्ववचनाश्रयं मिथः स्त्रीषु नृत्यमुपधाय दर्शयन्।**
**स प्रयोगनिपुणैः प्रयोक्तृभिः संजघर्ष सह मित्रसन्निधौ।।[1]**

तत्र मेघदूते संगीतस्य परिचर्चा मिलति-

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः**
**संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।**
**निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्**
**संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः।[2]**

तत्र समाजे विभिन्नसंस्काराणाम् अवसराणां समयेऽपि गणिकानां संगीतकार्यक्रमस्य आयोजनं भवतीति। सन्तानोत्पत्तिसमये गणिकानां संगीतव्यवस्थायाः सन्दर्भाः हर्षचरितेऽपि दृश्यन्ते। रघुवंशे एतादृशस्य संगीतस्य विषये कालिदासेन सूच्यते यत्-

**सुखश्रवा मङ्गलतूर्यनिस्वनाः**
**प्रमोदनृत्यैः सह वारयोषिताम्।**
**न केवलं सद्मनि मागधीपतेः**
**पथि व्यजृम्भन्त दिवौकसामपि।।[3]**

तत्र कुमारसम्भवे कार्तिकस्य जन्मोत्सवे संगीत-सभायाः उत्कृष्टोदाहरणं दृश्यते-

**ध्वनत्सु तूर्येषु सुमन्द्रमङ्क्यालिङ्ग्योर्ध्वकेष्वप्सरसो रसेन।**
**सुसन्धिबन्धं ननृतुः सुवृत्तगीतानुगं भावरसानुविद्धम्।।[4]**

रघुवंशेऽग्निवर्णराज्ञः वर्णनप्रसंगे उच्यते यत्-

**स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः।**
**नर्तकीरभिनयातिलङ्घिनीः पार्श्ववर्तिषु गुरुष्वलज्जयत्।।[5]**

तत्र ऋतुसंहारे श्रोत्रप्रियगीतनादविषये व्याख्यान-मस्ति यत् तैः गीतनादैः मनोरमानां हृदयमानन्दितं भवति-

**समदमधुकराणां कोकिलानां च नादैः**
**कुसुमितसहकारैः कर्णकारैश्च रम्यः।।**
**इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां,**
**तुदति कुसुममासो मन्मथोद्दीपनाय।।[6]**

नृत्यगीतादीनां शास्त्रीयज्ञानं विनापि जनानां सगीतं प्रति अत्याकर्षणं भवति स्म। संगीतसभायां यदापि गणिकाः च्युता भवन्ति तदैव ते अशिक्षिता अपि जनाः स्वसंगीतप्रेम्णा कार्यस्य सफलसंचालने रता भवन्ति इति रघुवंशे -

**लौल्यमेत्य गृहिणीपरिग्रहान्नर्तकीष्वसुलभासु तद्वपुः।**
**वर्तते स्म स कथंचिदालिखन्नङ्गुलीक्षरणसन्नवर्तिकः।।[7]**

तत्र विक्रमोर्वशीये कालिदासेन मधुकरगीतं वर्णयता संगीतस्य विषयमुपस्थाप्यते-

**गन्धोन्मादितमधुकरगीतैः वाद्यमानैः परभृततूर्यैः**
**प्रसूतपवनोद्वेल्लितपल्लवनिकरः**
**सुललिताविविधप्रकारैः नृत्यति कल्पतरुः।[8]**

एवं प्रकारेण संगीतकलायाः प्रकृष्टवर्णनात् कवि-कालिदासस्य रचनासु औचित्यपूर्णं वर्णनं सर्वत्र मिलति तस्मात् महाकवेः रचनासु सहृदयानां मनांसि आह्लादिता-नि भवन्ति तस्य काव्यानां च यशोगीतिः अद्यापि प्रचलति।

**सन्दर्भसूची** - 1. रघुवंशम्-19/36, 2. मेघदूतम्-1/60, 3. रघुवंशम् 3/19, 4. कुमारसम्भवम्-11/36, 5. रघुवंशम्-19/14, 6. ऋतुसंहारम्-6/29, 7. रघुवंशम्-19/19, 8. विक्रमोर्वशीयम्-4/12

**वरिष्ठ-अध्यापकः, जयपुरम्**

# आचार्यहेमचन्द्रस्य मते गृहस्थस्य चरित्रं त्रिवर्गसाधना च

❑ डॉ. उषाकिरण यादवः
मैना जैनः

**प्रस्तावना**

अतिविशाले संस्कृतवाङ्मये योगमाश्रित्य प्राचीन-कालादद्यावधिपर्यन्तमनेके ग्रन्थाः विरचिता अभवन्। हेमचन्द्राचार्येण द्वादशशताब्द्यां प्रणीतं 'योगशास्त्रं' योगस्यातिमहत्त्वपूर्णो ग्रन्थो विद्यते। ग्रन्थस्यास्य रचना चौलुक्यनरेशस्य श्रीकुमारपालस्यात्यनुरोधेन कृता। कुमारपालो हेमचन्द्रश्चोभावेव जैनधर्मस्य परिपालका-वास्ताम्। अतः योगस्य विस्तृतं वर्णनमत्र प्रमुखतः जैनग्रन्थानुरूपं कृतम्। स्वस्य मतस्य पुष्टये शास्त्रे वेदोपनिषद्स्मृतिपुराणादीनां शास्त्राणां मतान्यपि बहुशः समुद्धृतानि।

**चारित्रम्**

योगशास्त्रे चरित्रतत्त्वमस्य सविस्तरन्निरूपणं कृतम्। चरित्रं किं भवतीति ज्ञातुं योगस्य स्वरूपज्ञानमा-वश्यकमस्ति तच्च शास्त्रेऽभिहितमित्थं- ''चतुर्वर्गेऽग्रणी मोक्षो, योगस्तस्य च कारणम्।'' ज्ञान-श्रद्धा-चरित्ररूपं रत्नत्रयं च सः। पद्यस्यास्य वृत्त्यनुसारं धर्मअर्थ-कामो मोक्षश्चेते चत्वारो वर्गाः सन्ति, तेषु सर्वेच्छारहितो परमानन्दमयो मोक्षः सर्वश्रेष्ठो भवति। तस्य मोक्षस्य प्राप्तेर्हेतुः योगोऽस्ति। 1 पद्यस्योत्तरार्द्धेन ज्ञायते यत्कारणमिदं ज्ञान-श्रद्धा-चरित्ररत्नत्रयाणाम्मिश्रित-रूपं भवति। कस्याप्येकस्याभावे योग इति कथितुं न शक्यते। योगस्य स्वरूपाधायकानान्तत्त्वानामेषां लक्षणानीमानि सन्ति। ज्ञानं-यत्तत्त्वं यथावस्थितमस्ति तस्य तथैव संक्षेपविस्तारे वाऽवबोधनं सम्यग्ज्ञानं भवति।2 श्रद्धानं-जिनोक्ततत्त्वेषु रुचिभवनं सम्यक् श्रद्धानं कथ्यते।3

**चारित्रम्-**

सर्वपापान्वितानां व्यापाराणां त्यागश्चरित्रमुच्यते एतच्चाहिंसादिव्रतभेदेन पञ्चविधं भवति। सर्वशब्दोऽत्र मनोवचनकायवाचको विद्यते। त्यागस्याभिप्रायोऽस्ति-ज्ञानपूर्वकं परित्यजनम्। यतः ज्ञानेन श्रद्धया च युक्तश्चरित्रमेव सम्यग्चारित्रं भवति 4 त्रयाणान्तत्त्वानां लक्षणैर्ज्ञायते यद् सम्यग्तया प्राणतत्त्वं विद्यते चारित्रञ्च प्राणानां प्रवाहोऽस्त्यत एव चारित्रतत्त्वस्य वर्णनं विस्तारेण कृतम्।

**चरित्रभेदा :-**

चारित्रमत्र मुख्यतः सर्वविरतिचारित्रस्य वाचकं विद्यते। अस्योपासकाः यतयो भवन्ति ये चात्र श्रमणाः इति संज्ञया सम्बोधिताः। कुमारपालः गृहस्थः आसीत्। सः गृहे निवसन्नेव योगसाधनां कर्तुमैच्छत्। तस्य कृतेआचार्येण गृहस्थजनानाङ्कृते चारित्रतत्त्वस्य पृथक् कथनं कृतम्। चारित्रमिदं **'देशविरतिचारित्रम्'** इति नाम्नाऽभिहितम्। देशशब्दोंऽशस्या भिधायकोऽस्ति।

आचार्यस्य मतानुसारं गृहस्थी सर्वथा विरक्तो भवितुं न शक्नोति, हि गृहस्थाश्रमे तिष्ठन् सः परिवारस्य पालनपोषणजीविकादिभिर्प्रपञ्चैः ग्रस्तो भवत्यतः संघयणादिदौषैः सर्वविरतेराराधनां कर्तुं न शक्नोति, किन्तु सः सर्वविरतेरभिलाषी भवति। अतः सः देशविरति-चारित्रस्य निर्वाहं कर्तुं शक्नोति। एतादृशो गृहस्थोऽत्र 'श्रावकः' इत्युपाधिना सम्बोधितोऽस्ति। धर्माधिकारी मार्गानुसारी इत्यपरे द्वे संज्ञे स्तश्श्रावकस्यैव।5

उल्लेखनीयमिदमस्त्यत्र यत् श्रावकोचितस्य देशविरतिचारित्रस्याचरणात्पूर्वं गृहस्थिना निर्धारिताणां

पञ्चत्रिंशद्गुणानां परिपालनङ्करणीयम्। एषां साधनयैव गृहस्थी सद्गृहस्थी भवति ततश्च विशिष्टगृह-स्थिनः श्रावकस्य वा चारित्रस्य साधको भवितुमर्हति।

श्रावकस्य पञ्चत्रिंशद्गुणात्मिकायाः योग्यताया एव विशिष्टो गुणोऽस्ति-त्रिवर्गसाधना। अयमेव गुणोऽस्य शोधलेखस्य प्रमुखप्रतिपाद्यो विद्यते।

शास्त्रे गुणस्यास्य कथनं पद्यस्या र्धांशेनेत्थङ्कृतम्- 'अन्योन्याप्रतिबन्धेन त्रिवर्गमपि साधयन्।' त्रिवर्गमपि साधयन्निति गृहस्थस्य विशेषणमस्ति अर्थात् गृहस्थी त्रिवर्गस्य परिपालको भवति। त्रिवर्गे समाविष्टानां वर्गाणान्नामानि स्वरूपाणि च वृत्तौ प्रकटितानि।

**त्रिवर्गनामानि तेषां स्वरूपाणि च**- धर्मः अर्थः कामश्चेते त्रयो वर्गाः सन्ति।

**धर्मः**- येनाभ्युदयो मोक्षश्च सिद्ध्येते सो धर्मो भवति।

**अर्थः** - येन लौकिकानि सर्वाणि प्रयोजनानि पूर्णानि भवन्ति स अर्थः भवति।

**कामः** - अभिमानजन्या सर्वेन्द्रियसुखसम्बन्धिता रसयुता प्रीतिः कामोऽस्ति।४

त्रिवर्गसाधनाया एकं विशेषणमभिहितम् 'अन्योऽ-न्याप्रतिबन्धेन' अनेन त्रिवर्गस्य साधनायाः विधेर्कथनं कृतमाचार्येण इदञ्चातिमहत्त्वपूर्णमस्ति। उपायस्यास्य-विस्तृतं वर्णनं वृत्त्यनुरूपमित्थमस्ति -

**त्रिवर्गसाधनायाः विधिः** - सद्गृहस्थेन त्रयाणां वर्गाणां साधनेत्थं कर्त्तव्या येन त्रयोऽपि परस्परं बाधकाः न भवेयुः। कस्यचिदेकस्य द्वयोर्वा साधनोचिता न भवति। एकस्य मतस्य पुष्टिः नीतिकाराणामेतेन मतेन कृता यत्त्रिवर्गस्य परिपालनमकुर्वञ्जनः लोहकर्मकारस्य भस्त्रा इव व्यर्थमेव जीवति। त्रिवर्गे कस्याप्येकस्य द्वयोर्वो-पेक्षायाः ये दुष्परिणामाः भवन्ति, तेषाङ्कथनं सोदाहरणं कृतमग्रे। यो जनो धर्मस्यावहेलनां कृत्वा केवलं तत्त्वरहितेषु सांसारिकसुखेष्वासक्तो भवति स आरण्यकगज इव समस्याग्रस्तः जायते। एतादृशो गृहस्थी विषयभोगेष्वतिसंसक्तो भूत्वा धर्मार्थौ शरीरञ्च विनाश्य पराधीनो दुःखी च जायते।

धर्मार्थयोरुपेक्षां कृत्वा यो नरः केवलमर्थोपार्जेने एव संलग्नो भवति सः जीवनस्य सत्यानन्दम्मानसिकीं शान्तिञ्च प्राप्तुं न शक्नोति। जामाता सहभागिनः सर्वकार इतरे जनाश्च तस्य धने स्वाधिकारं स्थापयन्ति। सः केवलं श्रमङ्करोति। यथा हस्तिनो वधं कृत्वा सिंहः पापभाग् भवति तथैव सोऽपि केवलं पापाधिकारी जायते। अर्थकामयोरतिक्रमणङ्कृत्वैकस्यधर्मस्यैव सेवनमपि गृहस्थस्य न्यायोचितन्नास्ति। कारणमिदमस्ति यद्-गृहस्थिना स्वस्य सम्पूर्णपरिवारस्य समाजस्य देशस्य च कृते कर्त्तव्यानां निर्वहणमपि करणीयम्। यदि सः केवलन्धर्माचरणे संलग्नो जायते तदोत्तरदायित्वस्यानि-र्वाहेण दुःखी भवितुं शक्नोति। स्वस्याहारार्थमपि सः परजीवी भविष्यति। अतः केवलं साधुरेव धर्मास्यैकस्य सेवनं कर्तुं शक्नोति, गृहस्थः प्रायेण धर्मस्यैकान्ति-काचरणेऽसमर्थो भवति। तेन श्रमणानामुपासना सेवा भक्तिश्च कर्तुं शक्यन्ते। धर्मस्याचरणेऽनवरोधपूर्वकन्ते-नार्थकामयोर्निवहणङ्कर्तव्यम्। धर्मस्यानाचरणेन किं फलं भवतीत्यत्रैकेन दृष्टान्तेन स्पष्टीकृतमित्थं- यदा वपनार्थं संरक्षितानि बीजानि कृषकेण खाद्यन्ते, तदा सः सपरिवारो दुःखी जायते, तथैव गृहस्थजीवने धर्माचरणमकुर्वाणो जनो भविष्ये सुखदं फलं कल्याणं वा प्राप्तुं न शक्नोति। वस्तुतः स एव जनः सुखी भवति यस्य भाविजीवने सुखे बाधा न भवेत्। गृहस्थिनानेन दर्शनेन सुखस्यानु-भूतिर्करणीया वर्तमानकालेऽपि। भाविजीवनेनात्र पारलौकिकञ्जीवनमपि समाविष्टमस्ति। लौकिकपार-लौकिकसुखस्य कृते गृहस्थजीवने त्रयाणां वर्गाणां समन्वितः प्रयोग एव करणीय इत्यन्यैर्काराणैरपि

वर्णितमग्रांकितरूपे: -अर्थोपार्जनमकृत्वा यदि गृहस्थिना धर्मस्य कामस्य च सेवनङ्क्रियते तर्हि स ऋणी जायते। काममतिक्रम्य यदि स: धर्मार्थयो रूपसेवनं करोति तदेदृशो गृहस्थी नीरसो भवति, तस्य परिवारजना अप्यसन्तुष्टाः भवन्ति। कामपुरुषार्थस्य सर्वथोपेक्षाङ्-कुर्वाणो जन: गार्हस्थे स्थातुं न शक्नोति।

धर्मार्थकामेषु कस्याप्येकस्यैकान्तोपसेवी गृहस्थ-स्तातात्त्विको मूलहरो कदर्य इव स्वस्य जीवनस्य विकासे स्वयमेव बाधां समुपस्थापयति।9 तादात्त्विक: सो भवति योऽविचार्य एवोपार्जितस्य धनस्य व्ययं करोति।

यो नर: पितृपितामहादिभिर्पूर्वजैरर्जितस्य धनस्या-नैतिकविधिनोपभोगङ्कृत्वा विनाशं करोति सो मूलहर: कथ्यते।

यो मानवो सेवकानात्मानञ्च पीडयित्वा धनार्जनन्तु करोति, किन्तु तस्योचितस्थाने व्ययं न करोति स कदर्य इत्युच्यते।

तादात्त्विकमूलहरकदर्याणां त्रयाणामेव गृहस्थीनां कल्याणन्न भवति। यतस्तादात्त्विकस्य स्वस्य धनस्य मूलहरस्य धर्मस्यार्थस्य च विनाशो भवति। कदर्यस्य धनं सर्वकारेण राजकर्मिणा चोरेण वापह्रियते। तद्धनं तस्य धर्मकामार्थन्न विद्यते।

अत एव प्रतिपादितमिदं यद् गृहस्थिना त्रिवर्गस्या-बाधितोपसेवनेऽन्तरायो न करणीय:। त्रयेष्वेतेषु कस्यापि पुरुषार्थस्य सेवने यदि दैवयोगेन कदाचिद् बाधा समायाति तर्हि तदोत्तरोत्तरस्य पुरुषार्थस्य सेवनं त्यक्त्वा पूर्वपुरूषार्थस्य बाधाया: रक्षा करणीया। यथा कामेऽन्तराये समुपस्थिते धर्मस्यार्थस्य रक्षा करणीया एतयो: संरक्षितयो: कामस्याप्तिरपि सुगमतया भवितुं शक्यते। कामार्थयोरुपसेवने बाधाऽगमने धर्मस्य रक्षा करणीया, अर्थकामयोर्मूलन्धर्मो विद्यते। अस्मिन् विषये ग्रन्थकारेणान्यस्य नीतिज्ञस्य मतमपि प्रस्तुतीकृतम्। ग्रन्थकारस्य स्वस्य मतमस्ति यत् सज्जना: धर्मधनेन धनाढ्या: भवन्ति।10

**निष्कर्ष:** - शोधलेखस्य सारांशोऽयमस्ति यन्मोक्षप्राप्तये गृहस्थजनेनातिसावधानतया त्रिवर्गस्य संतुलितो निर्वाह: करणीय:।

**प्रासंगिकता** - अद्य गृहस्थानाङ्कृते मोक्षप्राप्तौ चारित्रविषये त्रिवर्गसाधनायाञ्चानेका: भ्रान्तयो विद्यन्ते। शोधलेखोऽयन्तासां निराकरणे सहायको भवितुं शक्नोति।

**सन्दर्भग्रन्थ: - योगशास्त्रम्।**

**शास्त्रस्य प्रणेता** - आचार्य हेमचन्द्र:। संशोधको सम्पादकश्च पं. मुनि: श्रीनेमिचन्द्र:। प्रकाशनकाल:- 1975 ई. वर्षे।

**मुद्रक:** - श्रीरामनारायणो मेड़तवाल:। श्रीविष्णु-प्रिंटिंगप्रेस राजामण्डी, आगरा-2

**सन्दर्भा:** 1. योगशास्त्रे, 1/15 वृत्तिश्च 2. यथावस्थित तत्त्वानां, संक्षेपाद् विस्तरेण वा। योऽवबोधस्तमत्राहु:, सम्यग्ज्ञानं मनीषिण:।। तत्रैव।। 16, 3. रुचिर्जिनोक्त-तत्त्वेषु, सम्यक् श्रद्धानमुच्यते। जायते तन्निसर्गेण गुरोरधिगमेन वा।। तत्रैव।। 17, 4. क- सर्वसावद्ययो-गानां, त्यागश्चारित्रमिष्यते। कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा।। तत्रैव।। 18, ख.- पद्यस्य वृत्ति: पृष्ठांक: 59, 5. क-सर्वात्मना यतीन्द्राणामेतच्चारित्रमीरितम्। यति-धर्मानुरक्तानां देशत: स्यादगारिणाम्।। तत्रैव।। 46, ख-पद्यस्य वृत्ति: पृष्ठांक: 79, 6. तत्रैव, 1/47-56, 7. तत्रैव, 1/52, 8. तत्रैव 86 पृष्ठे 1/52 पद्यस्य वृत्ति:।9. तत्रैव 86 पृष्ठे पद्यस्यास्य वृत्ति:। 10 तत्रैव 87 पृष्ठे पद्यस्यास्य वृत्ति:। विसर्गसन्धिस्वातन्त्र्यं मर्षितव्यम्।

**1. वरिष्ठप्रवक्त्री,**
**से.मु.मा. राजकीये स्नातकोत्तरे कन्यामहाविद्यालये,**
**भीलवाड़ानगरं ( राजस्थानम् )**
**2. शोधछात्रा, तत्रैव।**

# पाणिनिकृत-पञ्चपंक्तीनां विवेचनम्

❑ श्रीकांत मुद्गलः

स्तोःश्चुना इति- अत्र स्तोरिति स् च तुश्चेत्यनयोः समाहार इति स्तुस्तस्य स्तोरित्येव समाहारद्वन्द्वः। एवमेव श्चुनेत्यत्रापि पुंस्त्वं सौत्रत्वात्। नन्वितरेतरयोगमाश्रित्य द्विवचनं सौत्रत्वादित्येवं वैपरीत्यं कथं नेति चेन्न 'द्व्येकयोः' 'बहुषु' इति शास्त्रीयवचनव्यत्ययापेक्षया लौकिकलिङ्गव्यत्ययस्यैवो-चितत्वात्। तदुक्तं-'लिङ्गम-शिष्यं लोकानुगतत्वात्।' अत्र स्थान्यादेशयोर्यथा-संख्यं निमित्तकार्यिणोस्तु न शादिति ज्ञापकात्। अन्यथा विश्न इत्यत्र वर्गयोगाभावेन तस्य श्चुत्वप्राप्तौ शादिति व्यर्थमेव। एवं 'ष्टुना ष्टुः' इत्यत्रापि बोध्यम्॥ ज्ञापकं तु तत्र 'तोः षि' इति॥

ननु 'ष्टुना ष्टुः' इति सूत्रात् ' न पदान्तात्' इति सूत्रे टुपदस्यानुवृत्तावर्थवशाद् विभक्तेर्विपरिणामात् सिद्धौ टोः ग्रहणं किमर्थम्-इति चेत् सत्यम् 'एकयोगनिर्दिष्टत्वेन षकारस्याप्यनुवृत्तौ पदान्तषकारात् परस्य नामभिन्न-तकारस्यापि ष्टुत्वनिषेधः स्यात्। न च पदान्ते षकार एव दुर्लभः जश्त्वेनापहारात् इति वाच्यम्। सर्पिष्टममित्यत्र 'ह्रस्वात्तादौ तद्धिते' इति कृतस्य षत्वस्य जश्त्व-दृष्ट्याऽसिद्धत्वात् पदान्ते षकारस्य सुलभत्वात्तदाह-टोः किमित्यादि॥

**चतुर्मुखः इति** - ननु यथा एतन्मुरारित्यत्र 'यरोऽनुनासिक' इत्यनुनासिकस्तथैव चतुर्मुख इत्यत्रापि 'स्थानेऽन्तरतमः' 'उरण् रपरः' इति प्रथमान्ते संहितापाठेऽन्तरतम इत्यस्यादेशविशेषणत्वात् स्था-निवृत्तित्वे सति आदेशवृत्तित्वे सति आदेशान्तरावृत्तेरेव धर्मस्य ग्राह्यत्वेन प्रकृते च मूर्धस्थानजन्यत्वस्य स्थान्यादेशयोरुभयोः वृत्तित्वे सति ङकारादिषु आदेशान्तरेषु-अवृत्तित्वात् मूर्धस्थानवता णकारेणानुनासिकेन भाव्यम् इति चेन्न, सप्तम्यन्तपाठे अन्तरतम इत्यस्य स्थानविशेषणत्वेनादेश-वृत्तित्वे सति स्थानिवृत्तित्वे सति स्थान्यन्तरावृत्तेरेव धर्मस्य ग्राह्यत्वेन स्पृष्टप्रयत्नत्वे सति मूर्धस्थानजन्यत्वरूपधर्मस्यादेशे णकारे स्थानिनि टकारे च वृत्तित्वेन भवति षण्मुख इत्यत्र णकारादेशो, न तु चतुर्मुख इत्यादौ रेफस्य स्पृष्टप्रयत्नाभावात्। तदाह-'स्थानप्रयत्नाभ्यां' न प्रवर्तते। ननु सप्तम्यन्तपाठे 'सुद्ध्युपास्यः' इत्यत्र इको यणचि इति न स्यात्, आदेशे यकारे वर्तमानस्य तालुस्थानजन्यत्वे सति मात्राद्वयन्यूनकालिकत्वस्यादेशवृत्तिधर्मस्य स्थानिनि दीर्घे ईकारेऽसत्वात् सूत्रं तु दध्यानयेत्यादौ चरितार्थमिति चेत् अस्तु प्रथमान्तः पाठः। न च चतुर्मुख इत्यत्र दोष इति वाच्यम्, 'अनुस्वारस्य ययि' इत्यतः सवर्णपदमनुकृष्य सवर्णोऽनुनासिको भवतीत्यर्थे सति अदोषात् 'रेफोष्मणां सवर्णा न सन्ति' इति भाष्येण रेफस्य णकारेण सावर्ण्याभावात्॥

ननु तन्मात्रमित्यत्रेव 'प्रत्यये भाषायाम्' इत्यनुनासिकः ककुद्मन्त' इत्यत्रापि कुतो न अत आह 'यवादिगणे इत्यादि। न च गणे ककुद् इत्येव पठितं न तु ककुद्मानिति कथं निपातनादित्युच्यते इति वाच्यम्, मतुब्योगे वत्वनिषेधायैव तद्गणस्य सत्त्वेन तत्रानुनासिकस्येष्टत्वे प्रक्रियालाघवायानु-नासिकविशिष्टत्वे च पाठितव्ये दकारान्तसामर्थ्यात्तदभाव-कल्पनात्तदाह कथं तर्हीत्यादि॥

**पदस्येति किम् इति** - ननु 'मोऽनुस्वारः' इत्यत्र पदस्येति किमर्थमनुवर्तते, न च गम्यते इत्यादौ मस्यानुस्वारापत्तिरिति वाच्यं 'नश्चापदान्तस्य' इत्यत्र मकारानुवृत्तिर्व्यर्था सती नियमार्था स्यात् नियमश्च 'अपदान्तस्य' मस्य चेदनुस्वारस्तर्हि झल्येवे'ति गम्यत इत्यादौ दोषाभावादिति चेन्न, 'झलि परे मकारस्य चेदनुस्वारस्तर्हि अपदान्तस्यैव' इति विपरीतनियमापत्तौ 'हरिं सेवते' इत्यादावनुस्वारानापत्तेः॥

ननु कुर्वन्तीत्यत्र 'अट् कुप्वाङ्' इति णत्वं कथन्नेति चेन्न। 'पूर्वत्रासिद्धम्' इत्यनेन णत्वस्यानुस्वारदृष्ट्या असिद्धत्वात्। न चानुस्वारे परसवर्णे च कृते कथं न णत्वमिति-वाच्यं, णत्वदृष्ट्या परसवर्णस्या-सिद्धत्वात्तदाह कुर्वन्तीति न णत्वम्॥

**मो राजि समः क्वौ** - इति 'न राजि' इति सूत्रितेऽपि अनुस्वारनिषेधे सिद्धे मस्य मविधानं विकारमात्रबा-धनार्थमिति। 'हे मपरे वा' इत्यनुवृत्त्यै। अन्यथा 'अनन्तरस्य विधिर्वा' इत्यनुस्वारस्यैव निषेधेन 'मोनो धातोः'

इत्यस्यानिषेधेन प्रशान् ह्यलयतीति इत्यत्र नत्वापत्तिः॥

**ङमो ह्रस्वादचि इति** – ननु अत्राचीति सप्तम्याः 'तस्मिन्नित्युपस्थितौ 'अचि परेऽव्यवहितस्य पूर्वस्य ङमो ङमुट्' इत्यर्थे कुर्वन्+आस्ते इत्यत्र नुटो नकारावयवत्वे उत्तरस्य नकारस्य पदान्तत्वेऽपि पूर्वस्य तदभावात् पदान्तस्य' इति निषेधाप्रवृत्तौ 'रषाभ्यामट्कुप्वाङिति णत्वं स्यादिति चेन्न 'ङमः' इति पञ्चम्याः 'तस्मादिति' परिभाषाया अप्युपस्थितौ पूर्वस्य परस्य ङमुडिति विरोधे तस्मादित्युत्तरस्यैवेत्यदोषात्। न चैवमपि परमदण्डिना-वित्यादावन्तर्वर्तिविभक्त्या पदान्तत्वे नुडागमः स्यादिति वाच्यम्- 'उञि च पदे' इत्यस्मात् पदे इत्यनुवर्त्य अजादेः परस्य ङमुडित्यर्थेना-दोषात्। अत्र नित्यमिति स्पष्टार्थं 'हे मपरे वा' मय उञो वो वा' इति विकल्पद्वयमध्ये पाठादेव तल्लाभात्। 'ङम्' प्रत्याहारस्य क्वापि प्रयोगे सर्वस्याभावेन सामर्थ्यात् टित्त्वं ङकारणकारन-काररूपावयवेषु संबध्यते। नित्यमिति प्रायोऽर्थकं-यथा 'नित्यं प्रहसित' इत्यादौ। अत एव 'इको यणचि इत्यत्र न नुट्॥

**शोधार्थी, ज.रा.रा.सं.विश्वविद्यालयः, जयपुरम्**

# भवतु मे ''राष्ट्रम्''

❏ डॉ. राकेश शास्त्री

**आध्यात्मिक-रत्नप्रभा यत्र कणं प्रति शोभते**
**मोक्षसाधनं खलु प्रधानं यत्र सर्वदा।**
**प्रयाग-काशीसदृशैः पवित्रतीर्थस्थलैः**
**ऋद्धि-सिद्धिसंयुतं भवतु मे ''राष्ट्रम्''॥ 1॥**

**विकासतरंगिणी खलु राजते मोदिनी,**
**मातृ-भूः चिन्तनं हृदि सदैव विद्यते।**
**राष्ट्रे यत्र धृति-भावना विराजते,**
**पुरुषार्थचतुस्सम्पन्नं भवतु मे ''राष्ट्रम्''॥ 2॥**

**युवा त्यागाय सन्नद्धः, भवति राष्ट्रहेतोः,**
**मोक्षसिद्धिः प्रधानं वै, अस्ति यत्र सर्वदा।**
**गीर्वाणगीः सदा, जने-जने शोभते,**
**पौरुषविवृद्धियुतं, भवतु मे ''राष्ट्रम्''॥ 3॥**

**वेद-पुराणैर्यत्र, ज्ञानं सदा वितरितं,**
**मम नैव, नैव तव, इति गणनारहितम्।**
**ह्वेनसांग-समैर्यद्, वैदेशिकैः कीर्तितं,**
**संस्कारषोडशयुतं, भवतु मे ''राष्ट्रम्''॥ 4॥**

**पुराणानि प्रवाहयन्ति ज्ञान-स्रोतस्विनीम्।**
**अरावली पर्वतमाला खल्वत्र मनोहरा।**
**ह्वेनसांग-समैर्यद् वैदेशिकैः कीर्तितम्।**
**समाज-कल्याणपरं भवतु मे ''राष्ट्रम्''॥ 4॥**

**पक्वगोधूमयुतं काशहास-सम्पन्नं**
**पावनं भावनं भासनं रामलीलायुतम्।**
**हिमालय-सदृशमुच्च-भालसंयुतं**
**सस्यश्यामलसम्पन्नं भवतु मे ''राष्ट्रम्''॥ 5॥**

**भवत्वखिलचेष्टितमर्पितं वै राष्ट्रकृते,**
**प्रतिष्ठाऽस्य राष्ट्रस्य भवतु जगन्मण्डले।**
**विश्ववन्द्यस्थितिं प्राप्नोतु मे भारतं,**
**उत्कृष्टं खलु मण्डले भवतु मे ''राष्ट्रम्''॥ 6॥**

**विद्वद्भिर्वीर-देशभक्तैः यत् सदा पूरितं,**
**यत्र संस्मृत्य शुभाः गाथा रोमहर्षो जायते।**
**गंगा-यमुना-गोमती सरिद्भिर्यद् पावितं,**
**उच्चैः गौरवास्पदं भवतु मे ''राष्ट्रम्''॥ 7॥**

**स्वपापैर्हिंसको यत्र सदा स्वयं नश्यते,**
**विश्वबन्धुत्वभावना यत्र सदैव राजते।**
**ताटस्थ्य-नीति सदा यस्य प्रसिद्धा परा,**
**सत्यं शिवं सुन्दरं भवतु मे ''राष्ट्रम्''॥ 8॥**

**शोषितो न भवेद् कश्चिद् यत्र वै केनचित्,**
**व्याधिपीडितो न यत्र भवेद् वै कश्चन।**
**कृषक-श्रमिकानां स्विन्नगात्र-भास्वरं,**
**श्री-मेखलासंयुतं भवतु मे ''राष्ट्रम्''॥ 9॥**

**'सत्यमेव जयते' इति वाक् संयुतं,**
**नात्र व्रजेत् कोऽपि दैन्यं वै हीनताम्।**
**विश्ववन्द्यस्थितिं प्राप्नोतु मे भारतं,**
**नारी-हितचिन्तकं भवतु मे ''राष्ट्रम्''॥ 10॥**

**अखिलचेष्टितं खलु, राष्ट्रकृतेऽर्पितं**
**वीर-देशभक्तैः, महर्षिभिः वै प्रपूरितं,**
**भवन्तु सुखिनः सर्वे, पावनभावनायुतम्।**
**विश्ववन्द्यं खलु, भवतु मे ''राष्ट्रम्''॥ 11॥**

**अतिथिः खलु मुख्य, इति भावसंयुतं**
**कृत्वा फलाभिलाषां, कर्म नैव श्रेष्ठं**
**पूजनीया वै नारी, अस्तु मे ''राष्ट्रम्''॥ 12॥**

1-जे-38, हाउसिंग बोर्ड कॉलोनी, बांसवाड़ा (राज.)

# श्रौतयागविधौ श्रौतसूत्राणामुपयोगिता

❑ भारती आन्दोलन

ऋषिभिः स्वतपोबलेन अनुभूतं ज्ञानं, साक्षाद् ईश्वरीयं निःश्वासभूतम् आसीत्, वेदत्वेन ज्ञायते। वेदाः हि चत्वारः ऋग्यजुः सामाथर्वणभेदात् इति सुप्रसिद्धम्। अनन्तरं च अस्य एव वैदिकवाङ्मयस्य व्याख्यानाय अवगमनाय च ब्राह्मणारण्यकोपनिषदः सम्भूताः। इमेऽपि प्रतिवेदं भिन्नाः-भिन्नाः सन्ति। इतोऽपि वेदस्य अङ्गत्वेन वेदाङ्गाः सुप्रसिद्धाः- ''शिक्षाकल्पनिरुक्तछन्दोज्योतिषव्याकरणानि।'' तत्र कल्पसूत्रेषु एव श्रौतसूत्राणां प्रतिपादनं क्रियते। एभिरेव श्रौतसूत्रैः श्रौतयागाः सम्पद्यन्ते स्म। अतः श्रौतयागविधौ श्रौतसूत्राणामुपयोगिता अत्यन्तं वर्तते।

आश्वलायनसूत्रं शांखायनसूत्रं मशकसूत्रं लाट्यायनसूत्रं, द्राह्यायणसूत्रं बौधायनसूत्रं जैमिनीयं श्रौतसूत्रं चेति अनेकानि श्रौतसूत्राणि सन्ति।

शांखायन श्रौतसूत्रस्य प्रथमोऽध्यायः मन्त्रान् उपांशु ''ओम्'' इत्यनेन सह ''ओम्'' इत्यनेन विना, एवमेव च, ''याज्या'' इत्यस्य कृते च ''ये यजामहे'' इत्यनेन सह उच्चारणाय व्यवस्थां करोति। दर्शपूर्णमासयज्ञाः अमावस्यायां पूर्णिमायां च सम्पादनीयाः। अमावस्या-पूर्णिमा चाऽपि द्विधा भवतः। यदा चन्द्रमाः दृष्टः अदृष्टो वा अथवा यदा चन्द्रः पूर्णः अपूर्णो वा स्यात्।

आवाप शब्दस्य परिभाषा अपि ''अन्तरेणाज्यभागं स्विष्टकृतं च यदिज्यते तमावाप इत्याचक्षते'' रूपेण प्रदत्ता वर्तते। पुरोनुवाक्यां याज्यायाः पृथक् कुर्वन् सूत्रं निर्धारयति- अद्धि, पिब, जुषस्व, मत्स्व, आवृषायस्व, वीहि, प्रदेवतानामिति याज्यालक्षणानि। हुवे, हवामहे, श्रुध्यागह्येदं बर्हिर्निसीद प्रदेवतानामेति पुरोनु, वाक्यानुलक्षणानि।

तृतीयोऽध्यायः अग्निहोत्रेण सम्बद्धानामनेकेषां यज्ञानां वर्णनं करोति। एषु एकः ''बहुदेवता इष्टिः'' अर्थात् परस्परं कलहमानाः परिवाराः एकत्त्वाय अस्य अनुष्टानं कुर्युः। अन्ते च अग्निहोत्र-त्रुटीनां कारणात् प्रायश्चित्तानां वर्णनं दत्तम्।

लाट्यायनश्रौतसूत्रं सामवेदीयं प्रमुखं सूत्रं वर्तते। ''एक श्रुतिविधानान्मंत्रान् कर्मापि चोद्गातैव कुर्यादनादेशे'' प्रायः यज्ञेऽपि मन्त्रस्य एकश्रुतिपाठस्य निर्देशं करोति। तत्रोल्लिखितं वर्तते यद् यज्ञस्थलं कीदृशं स्यात्, प्रागुदकप्रवणं, लोमशम्, अवृक्षं समं चेति। सूत्यायै सर्वेभ्यः यज्ञेभ्यः सामान्यायाः पद्धत्याः सारस्वतेन तापश्चिन्तेन सह विधानं प्रदत्तम्। प्रस्तोता 'परिसामानि- सर्वत्रानादेशे' गायति। विस्तरेण अस्मिन् श्रौतसूत्रे (लाट्यायनसूत्रे) वर्णनं कृतमस्ति यत् कं सामं (रथन्तरं, यज्ञायज्ञीयं, वामदेवं) गातव्यम्। अनुभागषष्ठस्य प्रथमत्त्वेन इदं निर्देशितं यत् अंशाः कथं गातव्याः।

द्वितीयाध्याये ऋत्विजां तेषां स्थितीनां अग्रेः सवनस्य कुशायाः आसनस्य स्तुते श्च विषये विधानानि वर्णितानि। ''निष्क्रय पश्चिमेनाग्नीध्रीय बहिर्वेदि सूत्रं कुर्यात्'' इदं वाक्यं विवरणस्य सूक्ष्मतां वर्णयति। अश्वरथस्य दक्षिणा कथमिति वर्णनं वर्तते। रथारोहणस्य विधानं वर्तते। अनुभागे दशमे इदं वर्णनं मिलति यत् विविधाः सामाः तेषां स्तोमैः सह कथं गीयन्ते?

अध्यायः तृतीयः सोमयागेन तस्य दीक्षया च सह सम्बद्धो वर्तते। मंथनेन सह गीयमानानां साम्नामत्र सङ्केतः कृतः यैः द्वारैः पुरोहिताः यज्ञकर्तारः यज्ञस्थलात् बहिः गन्तुं शक्नुवन्ति, अथवा अन्तः आगन्तुं समर्थाः अस्मिन् सम्बन्धे सूक्ष्माः निर्देशाः प्रदत्ताः। महावर्तस्य वर्णने भाण्डितायननामकस्य आचार्यस्य उल्लेखो वर्तते।

द्राह्यायणश्रौतसूत्रम् अपि सामवेदीयं वर्तते। राणायनीया च शाखया सम्बद्धं वर्तते इदम्। अध्याये द्वितीये दीक्षायाः यज्ञशालायाः विषये च विस्तरेण वर्णनं वर्तते। चतुर्थे अध्याये उदुम्बरेण निमित्तस्य औदुम्बर-काष्ठस्य वीणायाः वर्णनं प्राप्यते। तस्याः रज्जूः लाट्यायनसदृशं मुञ्जस्य दर्भस्य वा वर्तते। बहिः च दक्षिणं दिशं प्रति मुखं कुर्वन्ती एका पुंश्चली अपि उपस्थिता वर्तते।

द्वितीये च अध्याये वाजपेयस्य वर्णनं वर्तते, यत्र प्रत्येकं वस्तु 17 संख्यापरिमितम् आवश्यकं भवति। 'यं ब्राह्मणा राजानश्च पुरस्कर्वीरन् स वाजपेयेन यजेत।' यज्ञकर्त्ता (वाजपेयी) इत्यस्य व्रतेषु प्रथमतया 'क्षत्रवृत्ति' वर्तयेत् अस्ति।

एवमस्माभिः श्रौतसूत्राणां केषाञ्चन अन्वेषणे इदं दृष्टं यत् श्रौतयागानां लघुषु कार्येषु अपि किं किं करणीयमिति विचारः श्रौतसूष्वेव प्राप्यते। लघोः कार्यात् सम्पन्नतां यावत् श्रौतसूत्राणामुपयोगिता अथवा नियमानामुपस्थानं श्रौतयागेषु परमम् आवश्यकम्। अतः श्रौतयागविधौ श्रौत-सूत्राणामुपयोगिता महती वर्तते यस्य वर्णनक्षमता मे लेखन्या नास्ति।

**शोधच्छात्रः, साहित्यविभागः**
**राष्ट्रियसंस्कृतसंस्थानाम्-जयपुरपरिसरः।**

❑ संवित् महर्षिः

# आस्तीकमहाकाव्यस्य साहित्ये योगदानम्

पद्यकाव्यस्य अन्तः परिगणिते-महाकाव्ये उदात्त-भावानां प्रचुरता दर्शनीया भवति। महाकाव्यस्य आकारः अपेक्षाकृत-विशालः भवति तथा तत्रपात्राणां सर्वाङ्गीण-चित्रणं प्रस्तूयते। एतस्मात् कारणात् भारतीय- संस्कृतेः संस्कृतस्य उन्नायककविना युगपुरुषेण आचार्य डॉ. वैकुण्ठनाथशास्त्रिणा प्रणीतम् ''आस्तीकमहाकाव्यम्'' आधुनिकसमये पुरातनमहाकाव्यपरम्परायै जीवन्तरूपं प्रदत्तवत् अस्ति तथा महाभारत-कालीन-पौराणिक-प्रसङ्गानां माध्यमेन वर्तमान-समाजे धर्मं प्रतिष्ठितं कर्त्तुं सफलः प्रयासो वर्तते।

आस्तीक-महाकाव्यस्य विस्तृते, सूक्ष्मतमे एवं गहनतमे अध्ययने कृते वयम् अवलोकयामः यत् संस्कृतस्योन्नयनदृष्ट्या विगते द्वे शताब्द्यौ स्वपूर्ववर्ति-कतिपय-शताब्दीभ्यः महत्त्वपूर्णे आस्ताम्। येन प्रकारेण मैक्समूलरः गुप्तकालाय स्वर्णयुगस्य संज्ञां दत्तवान्, तेन प्रकारेण वयं विगत-द्विशताब्द्योः समस्त-संस्कृत-काव्यानाम् अध्ययनं कुर्याम चेत् निश्चयेन एव तानि प्राचीनमानदण्डानां पालनं कुर्वन्ति अपि नवीनैः प्रतिमानैः सह पाठकान् आकृष्टान् कृतवन्ति। एकले राजस्थाने एव विगतद्विशताब्द्योः एकस्मात् एके धुरन्धरा आचार्याः लेखकाः गीतिकाराः महाकाव्यकाराः अभवन्। एतेषु विशिष्टस्थानरक्षकः आचार्यः डॉ. बैकुण्ठनाथशास्त्री 'आस्तीकमहाकाव्यं' रचयित्वा वर्तमाने आधुनिके युगे प्रह्रसतां नैतिकमूल्यानां पुनः स्थापनस्य स्वोद्देश्यं फलीभूतं कृतवान्।

शास्त्री विवेचने कृते आस्तीक-महाकाव्ये विनम्रतायाः सदाचारस्य सद्भावस्य, परोपकारस्य प्रेम्णः वीरतायाः समर्पणस्य च असीमाः कल्पनाः सज्जितवान्। नवीनान् यूनः उत्साहपरस्य कवेः शास्त्रिणः साहित्यं देशस्य काव्य-प्रेम्णाः सन्मानवस्य स्थितौ आनेतुं शक्नोति।

प्रस्तुत-महाकाव्ये तत्कालीन-युगस्य प्रतिच्छाया वर्तते। इदं स्वयुगस्य सामाजिकवर्गमान्यताः निष्ठाः आर्थिकनैतिकव्यवस्थाः तथा राजनैतिक-प्रयोजनानि अतीव शोचनीयानीति आकलनाम् कृत्वा प्रस्तुतानि करोति।

विवेचना नायकस्य क्षमतायाः तथा अन्यपात्राणां चारित्रिकोत्कर्षस्य प्रत्यक्षीकरणकारयित्री वर्तते। एतस्याः सर्वाणि पात्राणि स्व-स्वोद्देश्यानि फलीभूतानि कुर्वन्ति। महाभारतीय-पौराणिक-प्रसङ्गानां महाकाव्यीय रूपेण संयोजनं कवेः कौशलं व्यनक्ति तथा अनुभवः तस्य उर्वरायाः कल्पनायाः तथा यथार्थ-जीवनस्य अनुभूतिं प्रकटी-करोति।

एतेभ्यः अतिरिक्तम् एतस्मिन् अलौकिकतायाः भाग्यवादस्य आश्रयेण सह राजप्रासादस्य काननस्य तथा इन्द्रपुर्याः वर्णनं तस्य समयस्य भाावात्मकस्य एवं ऐश्वर्यात्मकस्य वातावरणस्य परिचयं ददाति।

आस्तीक-महाकाव्यस्य कान्तासम्मितोपदेशः एका ईदृशी विशेषता वर्तते या इदम् अन्य-कृतिभ्यः पृथक् करोति। देशस्य कालस्य च मान्यतानां प्रतिष्ठानां च दृष्ट्या अपि एतस्याः कृतेः सामाजिकं मूल्यं विद्यते। एतस्मात् कारणात् महाकाव्यं पाठकेभ्य इदं कथयत् प्रतीतं भवति यत् रामादिवत् प्रवर्तितव्यं न रावणादिवत्। महाकाव्यम् असत्ये सत्यस्य विजयं दर्शयत् धर्मच्युत-जनं धर्मं प्रति उन्मुखं करोति।

**शोधछात्रः, राष्ट्रिय-संस्कृत-संस्थानं**
**( मानित वि.वि. ) जयपुर परिसरः, जयपुरम्।**

# स्वच्छं भारतं नित्यम्

❑ दीपक कुमार शर्मा

**1. स्वच्छं भारतं, स्वच्छं भारतं, स्वच्छं भारतं नित्यम्।**
**वयं करिष्यामः, यूयं करिष्यथ, स्वच्छं भारतं नित्यम्।**

**2. दर्शनीयं भारतं, वन्दनीयं भारतं, पूजनीयं भारतं नित्यम्।**
**वयं वन्दिष्यामः, यूयं वन्दिष्यथ, नमनीयं भारतं नित्यम्।।**

**3. विशालं भारतं, निर्मलं भारतं, योग्यं भारतं नित्यम्।**
**वयं स्रक्ष्यामः, यूयं स्रक्ष्यथ, सम्पूर्णं भारतं नित्यम्।।**

**4. मित्रं भारतं, भ्राता भारतं, माता भारतं नित्यम्।**
**वयं रक्षिष्यामः, यूयं रक्षिष्यथ, पितरं भारतं नित्यम्।।**

**5. गन्तव्यं भारतं, द्रष्टव्यं भारतं, रोचनं भारतं नित्यम्।**
**वयं तनिष्यामः, यूयं तनिष्यथ, कीर्तिं भारतस्य नित्यम्।।**

**पाटन ( भीलवाड़ा )**

# अमरकविप्रणीतेश्रीकीर्तिकाव्ये वैष्णवदर्शनमतं श्रीकृष्णभगवतः परब्रह्मत्वम्

❑ पिंकेश दाधीच

अक्षुण्णार्यपरम्परासु दर्शनानां बीजोत्पत्तिः वेदेभ्य एव मन्यते। वैदिकदर्शनं षड्विधदर्शनरूपेण न्याय, वैशेषिक, साङ्ख्य, योग, मीमांसा तथा च वेदान्त इत्यादिषु धारासु प्रवाहितं वर्तते। भारतवर्षे दर्शनस्य एताः विविधाः परम्पराः सन्ति किन्तु तासां सर्वासां चिरबिन्दुः कैवल्यप्राप्तिः अथवा सर्वविधदुःखानां ऐकान्ति-कात्यान्तिकनिवारणमेव। वैदिकदर्शनधारासु वेदान्त-रूपिणी इयं धारा सर्वविधदर्शनेषु ऐक्यं स्थापयति। निर्गुणब्रह्मवादे अथवा सगुणईश्वरवादेऽपि वेदान्तदर्शने प्रचलितानां विविधपरम्पराणां विविधदार्शनिक-विचारधारासु सामञ्जस्यंस्थापयितुं भूमिका वर्तते। यद्यपि कालान्तरे वैदिकवेदान्तदर्शनं इष्टदेवतापरम्पराया भेदेन वैष्णव, शैव, शाक्तादिषु सम्प्रदायेषु संविभक्तं भवति तथापि एकमात्रचिरलक्ष्ये मोक्षप्राप्तेर्न कोऽपि बाधकः भवति। वैष्णवदर्शनमतावलम्बिनां चत्वारः सम्प्रदायाः सन्ति यथा-श्रीरामानुजाचार्यस्य श्रीसम्प्रदायः (विशिष्टाद्वैत), श्रीमाधवा-चार्यस्य ब्रह्मसम्प्रदायः (द्वैत) विष्णुस्वामीवल्लभाचार्ययोः रुद्रसम्प्रदायः (शुद्धाद्वैत) तथा निम्बार्काचार्यस्य सनक-सम्प्रदायः (द्वैताद्वैत) इति। अस्मिन्नेव क्रमे चैतन्यमहाप्रभूणां माध्वगौडीय सम्प्रदायः (अचिन्त्यभेदाभेदः) अपि आगच्छति।

एतेषां दर्शनानां प्रमुखलक्ष्यं जीव-ब्रह्म-माया-ईश्वर-अज्ञान-अध्यारोप-अपवाद-विवर्त-परब्रह्मादि-रूपेण अन्ते मोक्षप्राप्तिरेव।

मोक्षनिमित्ते एते सर्वे परब्रह्मादिरूपं किमपि एकं प्रधानतत्वं स्वीकुर्वन्ति। सर्वोयं चराचरजगत्प्रपञ्चः तस्य एव इति बोधयन्ति। दर्शनस्य एषा परम्परा अग्रे भक्तिमार्गे पुष्टीभूय जीवात्मा-परमात्मा चेति, द्वयोः भक्त-भगवद् रूपेण समुपस्थाप नां कुरुते। भगवान् कः ? यथा शास्त्रेषु उक्तम्-

**''ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा''**

अर्थात् भगवान् नाम षड्भगानां ऐश्वर्यवीर्ययशः श्रीज्ञानवैराग्याणां एकत्वमिति। अत एव दर्शनस्य एषा भक्ति-परम्परा विविधशास्त्रेषु इष्टदेवतायाः शक्तिमत्वरूपेण जीवब्रह्मयुत्या ब्रह्माण्डस्य संसृष्टिं करोति। यथा अमरकवि-प्रणीतश्रीकीर्तिकाव्ये भगवान्श्रीकृष्णः प्रधानतत्वपरब्रह्म-रूपेण अङ्गीकृतः। जगत्पितामह-पितृरूपेण श्रीकृष्णः ब्रह्मणः अपि पितृरूपेण सकलब्रह्माण्डस्य उत्पत्तिकारकः, सुखकारकः, उद्धारकः वर्तते यथा-

**''यत्पादाब्जजलं बिभर्ति गिरिशो मौलौ स्वकीये सदा,**
**यन्नामैति नवं नवं फणिपते जिह्वासहस्त्रद्वयम्।**
**भानुर्भ्राम्यति सन्ततं सुखकृते लोकस्य यस्याज्ञया,**
**सोऽयं चास्ति जगत्पितामहपिता गोवर्धनोद्धारकः।।''**

(श्रीकीर्ति १/२)

अस्मिन् जगति परमात्मस्वरूपः श्रीकृष्ण एव प्रमाणमस्ति। स एव पूर्णमदः पूर्णमिदं, पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।। इति पूर्णरूपेण भगवतः श्रीकृष्णस्य वासः इह खलु जगति। सर्वत्र विद्यमानत्वेऽपि तं ज्ञातुमसमर्थाः मनीषिणः। स मनसा अपि अप्राप्यः सन् प्राप्य भूयते तस्य महिमा एव यत् 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुत्यादिवचनानि तं पारयितुं न शक्नुवन्ति। यथा अमर-कविना स्वकाव्ये विलिखितम् -

**मनोऽपि न प्राप्य यतो निवर्त्तते,**
**कथाऽत्र का नाम गिरो गिरीडिते।**
**विदांवरैर्बोध्यत एव यत्नतो,**
**गणैः श्रुतीनामपि योऽवशेसते।।**

(श्रीकीर्ति-१/२२)

तस्य परब्रह्मणः श्रीकृष्णस्य स्वरूपमपि अकल्पनीयं वर्तते यथा-

**अणोरणीयान् समपि स्वरूपं,**
**स्वकीयमावर्धयते यदा वै।**
**तदैव लोकेऽपि न माति मृत्योः,**
**विभाति यस्मान्महतो महीयान्।।**

(श्रीकीर्तिः ३/४०)

अर्थात् परमात्मनः स्वरूपम् अणुमात्रमपि भवितुमर्हति अथवा स स्वकीयं स्वरूपं तावत् पर्यन्तं वर्धयितुं विस्तारयितुञ्च शक्नोति यावत् पर्यन्तं सकल-लोकसमूहः वर्तते। इदमित्थं सर्वं तद्भासा एव भासते। पुनश्च भक्तदृष्ट्या परमात्मनः स्वरूपं किञ्चित् पृथक्तां आधत्ते यथा-

**''सुवर्णवर्णांशुकशोभिसत्तनुः,**
**तमालनीलः शिखिपिच्छशेखरः।**
**करे सरत्नां वर वंशिकां दधन्,**
**नवीननीलाम्बुजनेत्रसुन्दरः।।''**

(श्रीकीर्ति ४/३२)

भक्तभावनामते तु मानवमात्ररूपे परमात्माः स्वर्णसदृश-पीताम्बरः, तमालवृक्षवत् नीलवर्णीयः, मयूरपङ्खशेखरः, वंशीविभूषितकरः, नीलाम्बुजरूपकः कमलनयनः इति रूपेण स्वीक्रियते कविना। पुनश्च 'आत्मस्वरूपः परिपूर्णकामः, पदार्थमात्रेऽप्यनुरागशून्यः' रूपेण परमात्मनः वैशिष्ट्यं वर्तते यत् सर्वविधाकाँक्षाणां, मनाकामनानाम् आश्रयस्थलं स परब्रह्म कृष्ण एव, यं तैत्तिरीयाश्रुतिरपि प्रलपति। परमात्मा श्रीकृष्णः चराचराणां कारणं वर्तते यथोक्तम्-

**चराचराणां प्रपितामहादयो,**
**निदानमेकं विबुधा वदन्ति यम्।**
**सदा परमब्रह्मतयापि निश्चितो,**
**निगद्यते योगिगणैर्महेश्वरः।।**

(श्रीकीर्ति १/१५)

सहृदयाः परमात्मानं रसस्वरूपकं स्वीकुर्वन्ति। ब्रह्मानन्दसहोदरः रसः इति मत्वैव रसराजं तं श्रीकृष्णं ध्यायन्ति, अनुगायन्ति च। यथा-

**नमो नमस्ते रसराज देव, प्रभा प्रकाशीकृतमारमूर्तिः।**
**विभो रसो वै स इति श्रुतिस्त्वां, प्रगायतीति प्रथितं पृथिव्याम्।**

(श्रीकीर्तिः १/३१)

इत्थं दशसर्गात्मक-काव्ये 'श्रीकीर्तिकाव्ये' अमर-कविर्विविध स्थलेषु भगवतः श्रीकृष्णस्य परब्रह्मत्वं स्वीकरोति, प्रकटीकरोति। केचन श्लोकाः यथा-

**मूर्तोऽसि नाथ विभुरप्यनिशं भवारे,**
**कामीव भासि सततं परिपूर्णकामः।**
**आत्मावबोधनिरतोऽपि नतानुभावी,**
**श्रीमंस्त्वमेव हि हरे शरणं ममासि।।**

(श्रीकीर्तिः १/३२)

इत्यत्र परब्रह्मश्रीकृष्णः सर्वव्यापक-निर्गुणरूपो भूत्वापि सर्वविधकामानां पूरकः वर्तते इति भावः विद्यते।

पुनश्च-

**सुमेरु सारोऽपि धुरा यदिच्छया,**
**गिरिद्रुतं सर्षप सन्निभो भवेत्।**
**अहो ! तमाकर्षयितुं स्वलीलया,**
**पिपीलिकापि ध्रुवमीश्वरी भुवि।।**

(श्रीकीर्ति. ३/४२)

अर्थात् परमात्मनः कृपया सुमेरूपर्वतवत् गुरूत्व-शीलोऽले सर्षपवत् भवितुमर्हति पुनश्च अतिगुरुं वसुमेरूमपि पिपीलिका तस्य कृपया उद्वोढुं शक्नोति। एतादृशः परमात्मनः भगवतः परब्रह्मत्वमस्ति।

पुनश्च -

**अनुग्रहं वाञ्छति यस्य पद्मभूः**
**शिवोऽप्यनन्तश्च तथा प्रभाकरः।**
**इति श्रुतं नारद वक्त्रपङ्कजात्**
**मया प्रिये पूर्वमतो वदामि ते।।**

(श्रीकीर्ति. ५/१५)

भावोऽस्ति यत् श्रीकृष्णभगवतः अनुग्रहं सर्वे देवाः प्राप्तुमिच्छन्ति। त्रिदेवेषु गणिता ब्रह्मा विष्णु-महेश्वरा अपि श्रीकृष्णकृपां प्राप्तुं समीहन्ते।

पुनश्च -

**ज्योतिर्यदेकं प्रवदन्ति कोविदाः,**
**चराचरस्य प्रभवं तदेव हि।**
**चन्द्रानने चिन्मयविग्रहोऽस्त्ययं,**
**दुर्वाससो वा वदनान्मयाश्रुतम्।।**

(श्रीकीर्ति ५/१६)

इत्थं श्रीकृष्णतत्वं वैष्णवदर्शनमते प्रतिपादितं तत्वत्रयेषु चित्, अचित्, ईश्वरः इति त्रिषु ईश्वरः अर्थात् भगवान् इतिरूपेण प्रयुक्तं विशिष्टपरब्रह्मतत्त्वं वर्तते। यथोक्तम्-

**वदन्ति यत्तत्वविदस्तात्त्वं यज्ज्ञानमद्वयम्।**
**ब्रह्मेति परमात्मेति भगवानिति शब्दते।।**

(श्रीमद्भाग. १/२/११)

एवं शेषमहेशगणेशादिसकलविधदेवानामाश्रय-स्थलभूतः, सकलवेदानां सारभूतोऽयमिति परब्रह्म-परमात्मानं श्रीकृष्णमहं सततं भजामि यथोक्तं-

**यं वै स्तुवन्ति शिवधर्मसुरेशशेष-,**
**लोकेशसिद्धिदगणेशसुरादयोऽपि।**
**राधारमाप्रकृतिभूविरजास्वराद्या,**
**वेदाः भजन्ति सततं तमहं भजामि।।**

**शोधार्थी,**
**संस्कृत-विभागः, राज. विश्वविद्यालयः, जयपुरम्**

नारी-स्तम्भः

# क्रान्तिकारिणी प्रीतिलता वादेदार

❑ डॉ. राजेश्वरी भट्ट

भारतीयस्वाधीनतासंग्रामे राष्ट्रहिते प्राणानुत्सर्जयन्तीषु क्रान्तिकारिणीषु वीराङ्गनासु ''प्रीतिलता-वादेदार'' अग्रगण्या युगयुगेभ्यः स्मरणीया च वर्तते। 5 मई 1911 तमे वर्षे सम्प्रति बङ्ग्लादेशे स्थिते चटग्रामे एकस्मिन् मध्यमवर्गीये परिवारे लब्ध-जन्मायाः प्रीतिलतायाः पिता नगरपालिका-कार्यालये कार्यरत आसीत्। बाल्यादेव कुशाग्र-बुद्धिसम्पन्नायाः प्रीतिलताया अध्ययने महती रूचिरासीत् तथापि नारीशिक्षां प्रति विमुखानामभि-भावकानामुपेक्षाभावेन पूर्वं प्रीतिलता अध्ययनाद् वञ्चिता जाता। किन्तु पुत्र्या दृढ़ानुरोधेन पित्रा गृह एव अन्यैर्बालकैः सह पुत्र्याः कृते पठनपाठनयोः व्यवस्था विहिता। तदा एव ज्ञातं यद् प्रीतिलता बुद्धिनैपुण्येन अन्यान् सर्वान् सहपाठिनोऽतिशेते। प्रीतिलताया बुद्धिनैपुण्येन गुरोरादेशेन च पिता पुत्रीं समुचितशिक्षायै विद्यालयं प्रेषितवान्। विद्यालये अध्ययनं कुर्वती प्रीतिलता 'बालचरसंस्थायाः' सदस्यतामधिगतवती। तदानीन्तने समये बालचर-संस्थायाः सदस्यानां कृते ब्रिटिशसर्वकारं प्रति एकनिष्ठता अनिवार्याऽऽसीत्। ब्रिटिशसर्वकास्य ईदृशेन कठोरादेशेन प्रीतिलताया मनसि बाल्यादेव विरोधिनो भावा बद्धमूला जाताः। विद्यालये अध्ययने व्यस्ताऽपि प्रीतिलता अवसरं प्राप्य क्रान्तिकारिभिर्युवकैः सह सम्पर्कं साधिवती। 1928 तमे वर्षे प्रथमश्रेण्यां मैट्रिक परीक्षामुत्तीर्य, ततो ढाकानगरे इंडेन-महाविद्यालयतः 'इंटर-मीडियेट' परीक्षायां निखले बोर्डे पञ्चमस्थानमधिगतवती। स्नातककक्षायां पठन्ती प्रीतिलता क्रान्तिकारिभिः युवकैः सह 'दीपवाली' संघस्य सदस्यता-मधिगतवती। संघेऽस्मिन् राष्ट्रनिष्ठानां युवकानां कृते अस्त्रशस्त्रसञ्चालनस्य प्रशिक्षणं सर्वथा सुलभ-मासीत्। प्रीतिलताया राष्ट्रनिष्ठया अभिभूतैः संघस्य पदाधिकारिभिः सा ''इंडियन सोशलिस्ट आर्मी'' इति दलस्य सम्मान्या सदस्यारूपेण प्रतिष्ठापिता। भयमुक्ता प्रीतिलता अनेकशः कारागारं गत्वा मृत्युदण्डभागिना राष्ट्रभक्तेन रामकृष्णविश्वासेन सह सम्पर्कं साधितवती। प्रीतिलताया अदम्यं साहसं अपूर्वां राष्ट्रनिष्ठाञ्च दृष्ट्वां क्रान्तिकारिणश्चमत्कृता आसन् राष्ट्रहिताय प्राणान् धारयन्त्याः प्रीतिलतायाः समर्पणभावेन आश्वस्तैः क्रान्तिकारिभिः प्रीतिलता ब्रिटिशाधिकारिणां आमोद प्रमोद भवनं 'बम' इति विस्फोटक पदार्थेन विध्वंसयितुमादिष्टा। ततः प्रीतिलतायां नेतृत्वे राष्ट्रनिष्ठ-क्रान्तिकारिभिःनृत्य-गायनयोः मत्तानां ब्रिटिशाधिकारिणां आमोद-प्रमोद भवने वातायनमार्गेण 'बम' इति विध्वंसकरी सामग्री प्रक्षिप्ता। अस्मिन् भीषणकर्मणि एकस्या ब्रिटिश-महिलायाः मृत्युरभवत् सहैव अनेके ब्रिटिशाधि-कारिणः क्षताविक्षताश्च जाताः। क्षणनेव आमोद-भवनं सहसा चीत्कारध्वनिना शब्दायमानं जातम्। क्षणमप्यत्रावस्थातुं मृत्योरामन्त्रणमिव भयङ्करमस्ति तथ्यमिदं जानन्ती प्रीतिलता सहचेरभ्यः त्वरया ततः पलायितुमकथयत् स्वयञ्च 'पोटेशियम साइनाइड' इति प्राणघातकं द्रव्यं खादित्वा आत्मघातमकरोत्। राष्ट्रहिताय मृत्युकारावासयोर्मध्ये सा मृत्युमेवा-वृणोत्। राष्ट्राभिमानिनी प्रीतिलता लोके मृताप्यमृता वर्तते। यशःशरीरेण सा अद्यापि जीवति। बङ्गलादेशे चटग्रामे प्रीतिलतायाः स्मृतौ प्राथमिकविद्यालये स्थापिता प्रीतिलताया मूर्तिरद्यापि तस्याः कीर्ति-कौमुदीं प्रसारयति। तदतिरिक्तं चटग्रामविश्वविद्यालये पदाधिकारिभिः प्रीतिलता-

**डॉल नाम्ना एकं विशालं भवनं विनिर्मितम्। प्रीतिलताया राष्ट्रनिष्ठा धन्या अपूर्वं बलिदानञ्च।**

## हिन्दी अनुवाद

भारतीय स्वाधीनता संग्राम में राष्ट्रहित के लिए प्राणों का त्याग करने वाली क्रान्तिकारिणी वीराङ्गनाओं में 'प्रीतिलता वादेदार' अग्रगण्या एवं युगयुगों तक स्मरणीया है, 5 मई 1911 ई. को आजकल बङ्ग्लादेश में स्थित चटग्राम में एक मध्यमवर्गीय परिवार में उत्पन्न प्रीतिलता के पिता नगरपालिका कार्यालय में कार्यरत थे। बाल्यकाल से ही कुशाग्रबुद्धि प्रीतिलता की पढ़ने में बहुत रुचि थी। किन्तु उस जमाने में नारी शिक्षा को समर्थन न देने वाले अभिभावकों के उपेक्षा भाव के कारण पूर्व में प्रीतिलता अध्ययन से वञ्चिज रही, किन्तु पुत्री के आग्रह एवं हठ के कारण पिता ने घर पर ही अन्य बालकों के साथ पुत्री के पठन पाठन की व्यवस्था कर दी। शीघ्र ही ज्ञात हुआ कि प्रीतिलता अपनी बुद्धि के बल पर अन्य सभी सहपाठियों से आगे है। प्रीतिलता के बुद्धि नैपुण्य एवं गुरु के आदेश से पिता ने पुत्री को समुचित शिक्षा के लिए विद्यालय में प्रवेश दिलवा दिया। विद्यालय में अध्ययन करती हुए प्रीतिलता ने बालचर संस्था की सदस्यता ग्रहण की। उस समय 'बालचर संस्था' के सदस्यों के लिए ब्रिटिश सरकार के प्रति एकनिष्ठता अनिवार्य थी। ब्रिटिश सरकार के इस कठोर आदेश से प्रीतिलता के मन में बाल्यावस्था से ही विरोधी भाव बद्धमूल हो गए। विद्यालय में अध्ययन में व्यस्त होते हुए भी प्रीतिलता क्रान्तिकारी राष्ट्रनिष्ठ युवा छात्रों के सम्पर्क में आ गई। 1928 ई. में प्रीतिलता ने मैट्रिक परीक्षा प्रथम श्रेणी से उत्तीर्ण की उसके पश्चात् ढाका नगर में अध्ययन करती हुई प्रीतिलता ने सम्पूर्ण बोर्ड में पाँचवा स्थान प्राप्त किया। स्नातक कक्षा में अध्ययन रत प्रीतिलता ने 'दीपवाली संघ' की सदस्यता ग्रहण की। इस संघ के सदस्यों के लिए अस्त्रशस्त्र सञ्चालन का प्रशिक्षण सर्वथा सुलभ था। प्रीतिलता की राष्ट्रनिष्ठा से अभिभूत संघ के पदाधिकारियों द्वारा प्रीतिलता को ''इंडियन सोशलिस्ट आर्मी'' की सदस्या के पद पर प्रतिष्ठित किया गया। प्रीतिलता ने अनेक बार कारागार में जाकर मृत्युदण्ड की सजा प्राप्त राष्ट्रभक्त रामकृष्ण विश्वास के साथ सम्पर्क किया। प्रीतिलता के अदम्य साहस एवं अपूर्व राष्ट्र भक्ति से पूर्णतः चमत्कृत एवं आश्वस्त क्रान्तिकारियों ने प्रीतिलता तो ब्रिटिश अधिकारियों के क्लब ''सामुदायिक भवन'' को 'बम' से विनष्ट करने का आदेश दिया। प्रीतिलता ने नृत्य एवं गायन में मस्त ब्रिटिश अधिकारियों के आमोद प्रमोद स्थल पर वातायन से विध्वंसक बम का विस्फोट किया। इस भीषण कर्म में एक ब्रिटिश महिला की मृत्यु हो गई तथा अनेक अधिकारी घायल हो गए। आमोद प्रमोद भवन सहसा भीषण चीत्कार ध्वनि से गुंजायमान हो गया। क्षणभर के लिए भी इस स्थान पर ठहरना मृत्यु को आमंत्रण देना है। इस तथ्य से अवगत प्रीतिलता ने अपने साथियों को वहाँ से भेजकर स्वयं 'पोटेशियम साइनाइड' नामक विषैले पदार्थ को खाकर आत्महत्या करली। राष्ट्र हितकामिनी प्रीतिलता ने मृत्यु एवं कारावास में से मृत्यु का ही वरण किया। राष्ट्र भक्त प्रीतिलता मरकर भी अमर हो गई। वह आज भी अपने यशरूपी शरीर से लोक में अमर है। बाङ्गलादेश के चटग्राम में प्रीतिलता की स्मृति में प्राथमिक विद्यालय में स्थापित मूर्ति आज भी प्रीतिलता की राष्ट्र भक्ति का प्रतीक है। इसके अतिरिक्त चटग्राम विश्वविद्यालय में पदाधिकारियों द्वारा 'प्रीतिलता हाल' नामक एक विशाल भवन का निर्माण सम्पन्न हुआ है। प्रीतिलता की राष्ट्रनिष्ठा एवं अपूर्व बलिदान युगयुगों तक स्मरणीय है।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# अशुद्धं न पिबेज्जलम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**चतुर्विंशतितत्वात्मके पाञ्चभौतिके ह्यस्मिन् शरीरे पाञ्चभौतिकतत्वानां यथावश्यकरूपेण संस्थितिर्वर्तते। किन्तु संघटनात्मके स्वरूपे स्थूलेन भौतिकस्वरूपेण जलीयांशस्य 70 प्रतिशतात्मकता शरीरे वर्तते। मूलरूपे तन्मात्रस्वरूपस्य रसतन्मात्रे संस्थितस्य जलस्य मात्रा त्वधिका न वर्तते। यद्यपि तन्मात्रेभ्य एव स्थूलमहाभूतानां समुत्पत्तिर्भवति, तथापि शरीरे जलस्य प्रत्यक्षरूपेण या संस्थिति-राधिक्येन दृश्यते सा तु शरीरावयवानां निर्माण-प्रक्रियायाः वैशिष्ट्येनावलोक्यते। प्रत्यक्षरूपेण स्थलजलरूपे द्रवरूपे च दृश्यमानस्य पदार्थस्य संस्थितिस्तु विभिन्नेष्वङ्गप्रत्यङ्गेषु संस्थिता वर्तते। तस्य न्यूनताऽधिकता वा अन्नपानमाध्यमेन गृहीतेन जलेन द्रवेण वा भवति।**

चतुर्विंशतितत्त्वात्मक पाञ्चभौतिक इस शरीर में पाञ्चभौतिक तत्त्वों की स्थिति यथावश्यक रूप में है। किन्तु संगठनात्मक स्वरूप में स्थूल भौतिकस्वरूप से शरीर में जलीयांश 70 प्रतिशत है। मूलरूप से तन्मात्र स्वरूप में रसतन्मात्र में स्थित जल की मात्रा तो अधिक नहीं है। यद्यपि तन्मात्राओं से ही स्थूल महाभूतों की उत्पत्ति होती है, तथापि शरीर में जल की प्रत्यक्ष रूप से जो स्थिति अधिक रूप से देखी जाती है वह तो शरीरावयवों की निर्माण-प्रक्रिया के वैशिष्ट्य से देखी जाती है। प्रत्यक्षरूप से स्थूल जलरूप में और द्रवरूप में दिखाई देने वाले पदार्थ की स्थिति तो विभिन्न अङ्ग प्रत्यङ्गों में संस्थित है। उसकी न्यूनता या अधिकता अन्नपान के माध्यम से गृहीत जल से या द्रव से होती है।

**शरीरे संस्थितस्य द्रवस्य सामान्यमात्रायां संस्थितिर्भवेदिति कृत्वा जलस्य पानं प्रतिदिनं नियमितरूपेण यथावश्यकरूपेणोचितमात्रायां कुर्वन्ति सर्वाणि भूतानि। श्वासप्रश्वास प्रक्रियायां तथा स्वेद-मूत्र-पुरीषाणां नियमितरूपेण यन्निष्क्रमणं भवति तस्मिन् जलस्य क्षपणं भवति। परिणामरूपे तु प्राणिनः तृष्णामनुभवन्ति। शरीरे जलस्य न्यूनतायाः संसूचिका तृष्णा जलपानेन द्रवपाने न वा शान्ता भवति। शरीरे संस्थितं जलं अस्थिसन्धीन्, नाडीतन्त्रं, विशेषेण तु सुषुम्नातन्त्रं, ज्ञानेन्द्रियाणामधिष्ठानानि च तेषां संवेदनावाहकानां तन्त्राणि च निरन्तरं सन्तर्पयति। अत एव हि तानि सर्वाणि तन्त्राणि स्वानि स्वानि कर्माणि सम्यक्रूपेण कुर्वन्ति। मस्तिष्क-स्यापि सम्पूर्णः भागः द्रवेणैव सन्तृप्तो भवत्यतः शरीरे निरन्तरं जलमाध्यमेन तर्पणमावश्यकम्।**

शरीर में स्थित द्रव की सामान्य मात्रा बनी रहे इसके लिए सभी प्राणी नियमित रूप से प्रतिदिन यथावश्यक रूप से उचित मात्रा में जल पीते हैं। श्वास-प्रश्वास-प्रक्रिया में तथा स्वेद, मूत्र, पुरीष का जो नियमित रूप से निष्क्रमण होता है उसमें जल का क्षय होता है। परिणाम रूप में तो प्राणी तृष्णा का अनुभव करते हैं। शरीर में जल की न्यूनता को सूचित करने वाली तृष्ण, जल के पीने से या द्रव के पीने से शान्त होती है। शरीर में स्थित जल अस्थि सन्धियों को नाडीतन्त्र को तथा विशेष रूप से तो सुषुम्नातन्त्र को तथा ज्ञानेन्द्रियों के अधिष्ठानों को एवं उनके संवेदनावाहक तन्त्रों को निरन्तर सन्तृप्त करती है। इसीलिए वे सभी तन्त्र अपने-अपने कर्मों को सम्यक्रूप से करते हैं, इसलिए शरीर में जल के माध्यम से निरन्तर तर्पण आवश्यक है।

**शरीरे संस्थितस्य द्रवस्य पूर्तिस्तु प्राथमिकरूपेण जलेनैव भवत्यत एव पेयस्य सुशुद्धस्य जलस्य विस्तृतं वर्णनमाचार्यैः कृतम्। सर्वे आचार्याः सर्वसम्मतस्वरूपेण जलं जीवनमित्यामनन्ति।**

**आचार्यः सुश्रुतः विस्तृतरूपेण जलस्य वर्णनं कुर्वाण एव कथयति यद् सर्वदा सुशुद्धमेव जलं पिबेत्। अशुद्धस्य जलस्य पाने तु बहुदोषाः सन्ति, यथा हि-**

**व्यापन्नं वर्जयेन्नित्यं तोयं यच्चाप्यनार्तवम्।**
**दोषसंजननं ह्येतन्नाददीताहितं तु तत्।।**
**व्यापन्नमुदकं यस्तु पिबतीहाप्रसादितम्।**
**श्वयथुं पाण्डुरोगं च त्वग्दोषमविपाकताम्।।**
**श्वासकासप्रतिश्याय शूलगुल्मोदराणि च।**
**अन्यान्वा विषमान् रोगान्प्राप्नुयादचिरेण सः।।**
**(सु.सू. 45/14-16)**

शरीर में स्थित द्रव की पूर्ति तो प्राथमिक रूप से जल से ही होती है, अत एव पीने योग्य सुशुद्ध जल का विस्तृत वर्णन आचार्यों के द्वारा किया गया है। सभी आचार्य सर्वसम्मतरूप से जल जीवन है ऐसा मानते हैं। आचार्य सुश्रुत विस्तृतरूप से जल का वर्णन करते हुए ही कहते हैं कि सर्वदा सुशुद्ध ही जल पीना चाहिए। अशुद्ध जल के पीने में तो अनेक दोष हैं, जैसे कि -

विकृत जल नित्य ही वर्जित है तथा अनार्तव जल (जो ऋतु के बिना बरसता है या ऋतुविशेष में उपयोग योग्य नहीं है) वह भी नहीं पीना चाहिए। यह दोषों को उत्पन्न करने वाला है, यह नहीं लेना (पीना) चाहिए, निश्चय ही यह अहितकर होता है। जो व्यक्ति विकृत जल को बिना शुद्ध किए ही पीता है वह शीघ्र ही शोथ, पाण्डुरोग, त्वचा की विकृति, अविपाक (अन्न का पाचन न होना), श्वास, कास, प्रतिश्याय, शूल, गुल्म और उदर रोगों को या अन्य विषम (कठिन, कष्टसाध्य) रोगों को प्राप्त करता है।

**सर्वप्रथमाचार्यः संसूचयति यद् आन्तरीक्षमेव जलं सर्वोत्कृष्टं भवति। तदेव पातव्यम्। तत्त्वेकान्ततः पथ्यतमं भवति। यथा हि -**

**'पानीयमान्तरीक्षमनिर्देश्यरसममृतं जीवनं तर्पणं धारणमाश्वासजननं श्रमक्लमपिपासामदमूर्च्छा-तन्द्रानिद्रादाहप्रशमनमेकान्ततः पथ्यतमं च।' (सु.सू. 45/3)**

**अत्र व्याख्याकारः उल्हणः स्पष्टयति यदत्रान्तरीक्षे भवं जलमान्तरीक्षं न भवत्यपि तु 'अन्तरीक्षादागतमान्तरीक्षं, न पुनस्तत्र भवः, कुतः ? मेघजलात्, तत्र जातं चेत्यके' (डल्हणः) एवमेव दिवि भवं दिव्यमित्यत्रापि जानीयात्। दिव्य-मान्तरीक्षञ्च पार्यायवाचिनौ शब्दौ। आन्तरीक्षं जलं जीवनमर्थात् प्राणधारणं भवति। तदेवामृतमिति अमृतमिवेत्यर्थः। तर्पणं तृप्तिजनकत्वात्, आश्वासजननमिति येन केनापि कारणेन द्रवधातोः क्षयेण शुष्कदेहानां प्राणजननम्। अस्मादेव हि कारणादिदमेकान्ततः पथ्यतमम्।**

सर्व प्रथम आचार्य सूचित करते हैं कि आन्तरीक्ष (आकाश से गिरा हुआ) पानी ही सर्वोत्कृष्ट होता है, वही पीना चाहिए, वह तो एकान्ततः पथ्यतम है। जैसे कि-

अन्तरिक्ष से गिरा हुआ पीन अव्यक्त रस वाला, अमृत, जीवन, तर्पण, धारण और आश्वासन देने वाला होता है। वह श्रम, क्लम (बिनाश्रम किए ही होने वाली थकान), प्यास, मद, मूर्च्छा, तन्द्रा (ऊँघना), निद्रा (कफवातकृत अनावश्यक अति निद्रा) और दाह का प्रशमन करने वाला तथा एकान्ततः पथ्यतम होता है।

यहाँ व्याख्याकार डल्हण स्पष्ट करते हैं कि यहाँ अन्तरीक्ष में उत्पन्न जल आन्तरीक्ष नहीं होता है अपितु अन्तरीक्ष से आया हुआ आन्तरीक्ष है, वहाँ उत्पन्न होने वाला नहीं। क्यों, किस कारण से ? मेघ से उत्पन्न होने के कारण, कुछ विद्वानों का मानना है कि वहाँ उत्पन्न (उल्हण) इसी तरह से दिव (आकाश) में होने वाले को दिव्य मानना चाहिए। दिव्य और आन्तरीक्ष पर्यायवाची शब्द हैं। आन्तरीक्ष जल जीवन अर्थात् प्राणधारण करने वाला होता है। वही अमृत है अर्थात् अमृत की तरह तृप्ति करने वाला होने के कारण तर्पण है। आश्वासजनन है अर्थात् जिस किसी भी कारण से द्रवधातु के क्षय के

कारण शुष्कदेह वालों का प्राणजनन है। इसी कारण से यह एकान्तत: पथ्यतम है।

**अत्रैकं तथ्यं वर्तते यदान्तरीक्षं जलं तात्कालिक-रूपेण प्रत्यक्षतः गृहीत्वैव तस्य सेवनं कर्तव्यम्। अन्तरीक्षप्रभवा आपस्तु खलु सौम्याः प्रकृतिशीताश्च भवन्ति। तास्त्वन्तरिक्षाद् भ्रश्यमानाः भ्रष्टाश्च विभिन्नैस्तत्त्वैः सह संमिश्रिता गुणान्तरीभूताः भवन्ति। न च सर्वदा प्रत्यक्षरूपेण तासां संग्रहणं सम्भवम्। आन्तरीक्षमपि केवलमाश्वयुजे मास्येव संग्रहणीयं वर्तते। यथा ह्याचार्यः सुश्रुतः निर्दिशति यत्-**

**'तत्र वर्षास्वान्तरिक्षमौद्भिदं वा सेवेत, महागुणत्वात्।'**

**वाक्यमिदं स्पष्टीकृतं डल्हणेन -**

**'अत्र वर्षाशब्दो वर्षान्ते आश्वयुजे वर्तते न तु भाद्रपदे, तत्रान्तरिक्षजलस्य निषिद्धत्वात्, तदुक्तं 'बलाहकाद्याः समदाः कीटा लूताश्च खेचराः। तद्विषोत्सर्गसंसर्गा-दग्राह्यं तत्तदा जलम् इति।''**

यहाँ एक तथ्य है कि आन्तरीक्ष जल को तात्कालिकरूप से प्रत्यक्षत: लेकर ही उसका सेवन करना चाहिए। अन्तरीक्ष से आने वाला जल तो निश्चय ही सौम्य होता है तथा स्वभावत: शीतल होता है। वह अन्तरिक्ष से गिरता हुआ या गिरा हुआ विभिन्न तत्त्वों के साथ सम्मिश्रित होकर दूसरे गुणों वाला हो जाता है। और उसका सदा प्रत्यक्ष रूप से एकत्रीकरण (संग्रह) भी सम्भव नहीं है। आन्तरीक्ष जल भी केवल आश्विन मास में संग्रह करने योग्य होता है। जैसा कि आचार्य सुश्रुत निर्दिष्ट करते हैं -

वर्षा में आन्तरिक्ष या औद्भिद (पृथ्वी से निकलने वाला नलकूप आदि के) जल का सेवन करना चाहिए, महा गुणवाला होने के कारण। इस वाक्य को डल्हण के द्वारा स्पष्ट किया गया है-

'यहाँ वर्षा शब्द वर्षा के अन्त में आश्विन मास में (आश्विन मास के लिए प्रयुक्त)' है, यह शब्द भाद्रपद के लिए प्रयुक्त नहीं है, वहाँ पर (भाद्रपद में) आन्तरिक्ष जल का प्रयोग निषिद्ध होने के कारण। जो कहा गया है-

मदयुक्त बलाका (या सारस) आदि तथा आकाश में विचरण करने वाला कीट और मकड़ी आदि से संसृष्ट होने के कारण तथा उनके द्वारा उत्सर्जित विष (या मलादि) से जल का संसर्ग होने के कारण वह जल अग्राह्य होता है।

**श्रावणे भाद्रपदे च मासयोः विभिन्नानां कीटानां तेषां चोत्सर्जितविषाणां संस्थितिः वर्तते आकाशे। वर्तमानकाले तु विभिन्नोद्योगेभ्यः उत्सर्जितैः प्रदूषितैर्गैसैरन्यैश्च रासायनिकसंमिश्रणैराकाशः परिव्याप्तो भवति। अत एव मासयोरनयोरापतितं जलं तत्संसर्गाद् विशेषरूपेण दूषितं भवति, तस्मात् कारणात्तज्जलं प्राथमिकरूपेण तत्कालमेव शुद्धमकृत्वैव न पिबेत्। तज्जलं संग्रहीतं तु काल-प्रभावाद् यदा संशुद्धं भवति तदा तु शरदि पातव्यम्। आचार्यः संसूचयति यत् नवीनस्य जलस्य पानेन बहवः बाह्याभ्यन्तराः रोगाः प्रादुर्भवन्ति। वर्षासु चत्वारः मासाः भवन्ति तत्र प्रारम्भिकेषु त्रिषु मासेषु वर्षितमान्तरीक्षं जलं प्रत्यक्षरूपेण शुद्धीकरणं बिना न पिबेत्, तद्धि जलं प्रत्यक्षं गृहीतमप्या-काशीयाशुद्धिभिस्तत्र व्याप्तविषादिभिश्च संसर्गाद् दूषितं भवत्यत एवाग्राह्यम्।**

श्रावण और भ्रादपद इन दोनों महीनों में विभिन्न कीटों की तथा उनके उत्सर्जित विषों की स्थिति आकाश में होती है। वर्तमान काल में तो विभिन्न उद्योगों के द्वारा छोडी गई विभिन्न गैसों से तथा अन्य रासायनिक सम्मिश्रणों से आकाश चारों ओर से व्याप्त होता है। इसलिए इन दोनों महीनों में गिरा हुआ (या गिरता हुआ) जल उनके संसर्ग के कारण विशेष रूप से दूषित होता है, इस कारण से वह जल प्राथमिक रूप से तत्काल ही शुद्ध किए बिना नहीं पीना चाहिए। इकट्ठा किया हुआ वह जल

तो काल के प्रभाव से जब शुद्ध हो जाता है तब तो शरद् ऋतु में पीना चाहिए। आचार्य सूचित करते हैं कि नवीन जल (आन्तरीक्ष जल) के पीने से अनेक बाह्य और आभ्यन्तर रोग उत्पन्न होते हैं। वर्षा में चार महीने (आषाढ, श्रावण, भाद्रपद, आश्विन) होते हैं, उनमें प्रारम्भिक तीन महीनों में बरसा हुआ आन्तरिक्ष जल प्रत्यक्ष रूप से (सीधे ही) शुद्ध किए बिना नहीं पीना चाहिए। वह प्रत्यक्ष रूप से गृहीत किया हुआ भी जल आकाशीय अशुद्धियों से तथा वहाँ व्याप्त विषादि से संसृष्ट होने (मिलने) के कारण दूषित होता है, अतः अग्राह्य होता है।

**वर्षाकालीनं भूमौ पतितं सरःसु तडागेषु वा सञ्चितमपि जलं वर्षासु न पिबेत्। एवमेव-नदीजलमपि वर्षास्वपेयं भवति। यतो हि वसुधाकीटसर्पाखुमलसंदूषितोदकाः वर्षाजलवहाः नद्यः दोषसमीरणाः भवन्त्येवमेव सरस्तडागादिष्वपि कलुषितं जलं भवति। यथा हि-**

**कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम्।**
**तृणपर्णोत्करयुतं कलुषं विषसंयुतम्।।**
**योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम्।**
**स बाह्याभ्यन्तरान् रोगान् प्राप्नुयात् क्षिप्रमेव तु।।**
**(सु.सू. 45/9-10)**

**अत्र प्रयुक्तस्य 'वर्षासु' इति शब्दस्यार्थं प्रकाशयति व्याख्याकारः डल्हणः, यथा-वर्षास्विति आश्वयुजं विहायाषाढ श्रावणभाद्रपदाः गृह्यन्ते। वर्षा शब्दोऽयं प्रावृषि वर्षासु च वर्तते। तदाह-वर्षासु चतुरो मासान् मात्रावदुदकं पिबेत्। (डल्हणः)**

**वर्षासु जलं विशेषेणाशुद्धं भवत्यत एव तन्न पातव्यं शुद्धिं विना। वर्षातिरिक्ते तु काले कालप्रभावाज्जलं शुद्धं भवति प्रसन्नत्वात्। अतः तन्नु पेयं वर्तते, किन्तु विशेषेणाप्रदुष्टमपि तत्किञ्चिद् दूषितं भवत्यत एव शुद्धं कृत्वैव सर्वदा जलं पिबेत्। कदाप्यशुद्धं जलं न पिबेत्।**

भूमि पर गिरा हुआ वर्षाकालीन जल और सरोवर (झील) या तालाब में इकट्ठा किया हुआ वर्षाकालीन जल वर्षा में न पीये। इसी तरह नदीजल भी वर्षा में अपेय (न पीने योग्य) होता है। क्योंकि पृथ्वी पर रहने वाले कीट, सर्प एवं चूहे आदि के मल से दूषित जलवाली वर्षा के जल को वहन करने वाली नदियाँ दोष को प्रेरित करने (बढाने) वाली होती हैं, इसी तरह सरोवर, तालाब आदि में भी कलुषित (मलिन) जल होता है, जैसे कि –

कीट, मूत्र, पुरीष, अण्डे, शव और सडन करने वाले (कूथ पूतीभावे) पदार्थों से दूषित, तिनके और पत्रों के समूह से युक्त दूषित, विष मिला हुआ नवीन जल जो वर्षा में पीता है या उसमें अवगाहन (पानी में घुसकर स्नान करना, डुबकी लगाना) करता है वह शीघ्र ही बाह्य (कुष्ठादि) तथा आभ्यन्तर (शोथ, उदरादि) रोगों को प्राप्त करता है।

यहाँ प्रयुक्त 'वर्षासु' (वर्षा में) इस शब्द के अर्थ को व्याख्याकार डल्हण स्पष्ट करते हैं कि – 'वर्षा में' अर्थात् आश्विन को छोड़कर आषाढ, श्रावण और भाद्रपद मास ग्रहण किए जाते हैं। यह वर्षाशब्द प्रावृट् ऋतु (आषाढ़, श्रावण) और वर्षा (भाद्रपद, आश्विन) ऋतु के लिए प्रयुक्त है। जो कहते हैं वर्षा में चार महीनों में मात्रापूर्वक पानी पीवे।

वर्षा में जल विशेष रूप से अशुद्ध होता है, अतः इसे शुद्ध किए बिना न पीवे। वर्षा के अतिरिक्त समय में तो काल के प्रभाव से जल के प्रसन्न (साफ होने, गन्दगी जम कर तल में बैठ जाने) हो जाने से जल शुद्ध हो जाता है। इसलिए वह तो पीने योग्य होता है किन्तु विशेष रूप से अदूषित भी वह जल कुछ तो दूषित होता ही है अतः जल को सर्वदा शुद्ध कर के ही पीवे। कभी भी अशुद्ध जल को न पीवे।

**८०, सेनापति हाउस के पीछे, प्रेमनगरम्,**
**झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,